शारदायनम्

प्रधानसम्पादकः प्रो.पी.एन्.शास्त्री

सम्पादकौ

प्रो.मनोज कुमार मिश्रः डॉ.सतीश कुमार कपूरः

प्रकाशकः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

मानवसंसाधनविकासमन्त्रालयभारतसर्वकारेण सञ्चालितः

श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - १८११२२

।। शारदायनम् ।।

(शोधपत्रसङ्ग्रहात्मको ग्रन्थः)

प्रधानसम्पादकः

प्रो.पी.एन्.शास्त्री
प्र. प्राचार्यः

सम्पादकौ

मनोज कुमार मिश्रः
वेदविभागाध्यक्षः

डॉ. सतीश कुमार कपूरः
साहित्यविभागाध्यक्षः

प्रकाशकः

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
मानवसंसाधनविकासमन्त्रालयभारतसर्वकारेण सञ्चालितः
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - १८११२२

© सर्वाधिकारो जम्मूस्थराष्ट्रियसंस्कृतसंस्थान-
(मानितविश्वविद्यालयः) श्रीरणवीरपरिसराधीनः
कोट-भलवाल, जम्मूः - १८११२२

प्रकाशनवर्षम्-२०१४
शारदायनम्
प्रथमसंस्करणम्- ५०० प्रतियाँ

प्रकाशकः -
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
मानवसंसाधनविकासमन्त्रालयभारतसर्वकारेण सञ्चालितः
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - १८११२२

प्राप्तिस्थलसङ्केतः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - १८११२२

मुद्रकः-
न्यू.आर.के.प्रिन्टर्स,
१८९-ए, गांधी नगर, जम्मू-१८०००४

विषयानुक्रमणिका

क्रमांक विषय	लेखक नाम	पृष्ठ संख्या
शैवदर्शनम् (Sanskrit)		
1—काश्मीरशैवदर्शनस्य शैक्षिकमहत्वम्	डॉ. विजयपाल कछवाह	1—5
2—शब्दशक्तिसिद्धान्तविकासे काश्मीरीयं योगदानम्	डॉ. सुज्ञान कु.महान्तिः	6—11
3—प्रत्यभिज्ञा-अद्वैतवेदान्तदर्शनयोः साम्यवैषम्यविचारः	मंजुनाथ एस.जी.	12—17
4—काश्मीर शैवदर्शने मोक्ष स्वरुपडॉ. विचारः	शुभश्री द्राशः	18—19
5—भट्टतौतप्रतिपादितबुद्धिनिरूपणे मनोवैज्ञानिकता	डॉ. नारायण वैद्यः	20—21
6—व्याकरणशैवदर्शनयोः शब्दतत्त्वम्	राहुलशर्मा	22—24
7—शैवदर्शने अभिनवगुप्तस्य योगदानम्	पुरूषोत्तम दासः	25—27
शैवदर्शनम् (Hindi)		
8—शैवदर्शन में अनेकता एकतावाद	डॉ. पारस राम शास्त्री	28—31
9—काश्मीरी शैवदर्शन के शिवसूत्रों में योग	डॉ. सुनीता गुप्ता	32—37
10—काश्मीर शैवदर्षन पर वसुगुप्त का प्रभाव	डॉ. राजेश शर्मा	38—40
11—काश्मीर शैवदर्शन में परमसत्ता का स्वरूप	डॉ. पीयूष बाला	41—45
12—काश्मीर शैव दर्शन के मूर्धन्य श्री उत्पलदेव	डॉ. बलदेव चन्द शास्त्री	46—51
13—व्याकरण एवं शैवसिद्धान्त की दृष्टि से पश्यन्ती वाणी का विवेचन	डॉ.सच्चिदानन्द शर्मा	52—56
14—लल्लेश्वरी तथा त्रिक शास्त्र	पुष्कर नाथ रैणा	57—62
15—काश्मीर शैवदर्शन में तत्त्वों का विवेचन	विद्यासागर	63—69
16—शैवदर्शन में तत्त्व विचार	हृदयेश शर्मा	70—72
17—काश्मीर शैव दर्शन में मोक्ष	विचित्र कुमार शर्मा	73—76
18—काश्मीर शैव दर्शन में आचार्य अभिनवगुप्त का योगदान	पूनम शर्मा	77—83
19—काश्मीर शैव दर्शन में आचार्य उत्पलदेव का योगदान	हरीश कुमार	84—89

क्रमांक विषय	लेखक नाम	पृष्ठ संख्या
20—काश्मीर शैव दर्शन में बन्ध मोक्ष की अभिव्यक्ति	इन्द्र जीत, एम.ए.	90—95
21—काश्मीर शैव दर्शन में आचार्य क्षेमराज का योगदान	पर्वनी शर्मा	96—101
22—वैदिक वाङ्गमय में शैवदर्शन	कौशल किशोर बिजल्वाण	102—104
23—कश्मीरशैवदर्शन के आलोकें में मोक्ष-बन्धन स्वरूप विमर्श	दिनेश कुमार मिश्र	105—109
24—शिव एवं शक्ति-एक विर्मश	तरसेम कुमार शर्मा	110—112
शैवदर्शनम् (English)		
25—Trik tradition and it's Historical aspect	Dr. R.N.Thakur	113—118
26—Kashmir Shaiv Darshan through Pancastavi and other Shiri Yogni's such as Laleshwari and Maa Alkashwari	Dr. R.K. Bhat	119—123
साहित्यशास्त्रम् (Sanskrit)		
27—काश्मीर वास्तव्यस्य भट्टलोल्लस्य रसनिस्पत्तिविशयकविमर्शः	प्रो. विद्यानन्दझा	124—132
28—काश्मीरसाहित्यपरम्परायां विष्णुधर्मोत्तरपुराणस्यावदानम्	डॉ. नरेश बत्रा	133—134
२६-संस्कृत शास्त्र परम्परायाः संवर्धने उद्भट भट्टस्य योगदानम्	डॉ. प्रतिभा	135—138
30—काव्यशास्त्रे महाकविबिल्हणस्य दृष्टिः	योगेश कुमार अवस्थी	139—141
31—साहित्यशास्त्रपरम्परायां मम्मटमहोदयस्य योगदानम्	प्रमोदकुमारशुक्लः	142—145
32—काव्य-स्वरूपनिरूपणे कश्मीरवासिनः मम्टाचार्यस्य योगदानम्	सुशान्तशर्मा	146—149
33—अलङ्कारशास्त्रसम्प्रदायानां परिधौ काश्मीरविदुशां योगदानम्	सुरेशस्वामी	150—157
34—भारतीयनाट्यकलायां गीत-वाद्य-नृत्तानि	प्रमोदषुक्लः	158—164
35—शैवदर्शन-साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां योगदानम्	जितेन्द्र तिवारी	165—168
36—शैवदर्ष-साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां योगदानम्	बृजकिशोरः बिदुआ	169—174
37—कश्मीरप्रान्तस्य प्रमुखाः वैयाकरणाः	करूणेश कुमार शुक्ला	175—178

38–काव्यप्रयोजननिर्धारणे कश्मीराचार्याणाम योगदानम्	जगदीश शर्मा	179–183
39–आनन्दवर्धनस्य ध्वनिः सिद्धान्तः	प्रवीण कुमारः	184–186

साहित्यशास्त्रम् (Hindi)

40–साहित्यशास्त्र परम्परा के संवर्धन में कश्मीरी कवि कल्हण का योगदान	डॉ. अशोक कुमार	187–193
41–आचार्य मङ्खक (मङ्ख) का संस्कृत साहित्य को योगदान	शुभ कुमार	194–196
42–आचार्य क्षेमेन्द्र का काव्यशास्त्र को योगदान	पुष्पेन्द्र जोशी	197–202
43–आचार्य विल्हण का संस्कृत साहित्य को योगदान	सत्यप्रिय आर्य	203–206
44–संस्कृत साहित्य को कश्मीर का योगदान	डॉ. कमल किशोर	207–214
45–संस्कृतसाहित्यस्तोत्र-परम्परा में काश्मीरकवि लोष्ठक का योगदान	मुकेश शर्मा	215–220
46–काश्मीरी कवि राजानकरत्नकण्ठ का संस्कृत साहित्य में योगदान	सुनील दत्त	221–226
47–काश्मीरी साहित्यकारों का संस्कृत साहित्य में अवदान	दीपिका गोलिया	227–230
48–मुक्तककाव्य परम्परा में आचार्य भल्लट का योगदान	उमेश पौडेल	231–237
49-आचार्य मम्मट द्वारा प्रतिपादित काव्य-प्रयोजन	अतुल कुमार शर्मा	238–242
49-आचार्य रुद्रट एवं रसतत्त्व विवेचन	योगेश कुमार शर्मा	243–245
50-साहित्यशास्त्र में काश्मीर कवि वामन का योगदान	अमन महाजन	246–247
51-अलंकारशास्त्रपरम्परा में काश्मीरी आचार्य मम्मट का योगदान	विक्रम शर्मा	248–249
52-संस्कृत वाङ्गमय में आचार्य कल्हण का योगदान	पूजा शर्मा	250–254

53-क्षेमेन्द्र की जन्सम्पदा एवं संस्कृत साहित्य	रोतमा देची	255–261
54-काश्मीरी आचार्य आनन्दवर्धन का संस्कृत साहित्य को योगदान	पल्लवी गुप्ता	262–267
55-काश्मीरी आचार्य शम्भु का संस्कृत साहित्य को योगदान	ज्योति देवी	268–271
56-कश्मीरी आचार्यों का संस्कृत साहित्य में योगदान	पूर्ण चन्द	272–280
57-कश्मीर के ऐतिहासिक काव्य	अभय त्रिपाठी	281–284

साहित्यशास्त्रम् (English)

58–काश्मीरशैवदर्शनमीमांसा	डॉ.सावित्री शतपथी	285–288
59–Contribution of Acharya Ksemendra in Sanskrit Poeitcs	Amandeep	289–296

श्रीः

काश्मीरपुरवासिन्याः मातुः शारदायाः पदतले देवभूमौ राष्ट्रियसंस्कृतसंस्थानस्य परिसरेष्वन्यतमः श्रीरणवीरपरिसरः राराज्यते। संस्कृतसाहित्यपारावारे तत्रापि शैवदर्शन–साहित्यशास्त्रयोः काश्मीराणां योगदानं सर्वविदितं वर्तते । तत्र सोमानन्दः, उत्पलदेवः, अभिनवगुप्तः, भटकल्लटप्रभृतयो दार्शनिकाः, भामहः, वामनः, उद्भटः, रुद्रटः, भटलोल्लटः, भट्टशङ्कुकः, आनन्दवर्धनः, अभिनवगुप्तः, कुन्तकः, क्षेमेन्द्रः, महिमभटः, रुय्यकः, मम्मटः, कल्हणः, बिल्हणः, जल्हणप्रभृतयः काव्यशास्त्रविदः भारतवर्षस्य प्रतिष्ठां स्थापयामासुः । गतवैभवं स्मर्तुं पुनःस्थापयितुं च दिनत्रयव्यापिनी राष्ट्रियसङ्गोष्ठी भृशमुपकरोतीति विश्वसिमि।

सङ्गोष्ठीं प्रति राष्ट्रस्य विभिन्नप्रान्तेभ्यः समाहताः दर्शनसाहित्यविशारदाः मार्चमासस्य 19,20,21 दिनाङ्केषु विषयमन्थनेन स्वविचारान् प्रत्यपादयन् । मार्चमासस्य नवदशे दिनाङ्के जम्मूकश्मीरराज्यपालानां करकमलाभ्यां समुदघटितेयं सङ्गोष्ठी दिनत्रयं प्राचलत् । उदघाटनावसरे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः डॉ. एन.आर.कण्णन, पद्मश्री प्रो. वेदकुमारी घई, राष्ट्रपतिपुरस्कारभाक् प्रो. विश्वमूर्ति शास्त्री अन्ये च मान्याः नागरिकाः समुपस्थिताः आसन् .समापने कुलपतिवरः प्रोफेसर श्रीधरवसिष्ठ, कुलपतिः प्रोफेसर रमेशपाण्डेयः अन्ये य विद्वांसः सन्निहिता आसन् ।

परश्शतं विद्वांसः विभिन्नसत्रेषु भागमवहन् समेषां विचाराणां लिपिबद्धा स्मारिकेयं प्रकाशपथमायाति । सङ्गोष्ठीसंयोजकयोः प्रोफेसर मनोजकुमार मिश्रः, डॉ. सतीशकुमारकपूरः, इत्यनयोः लेखनसम्पादकयोः परिश्रमेण प्रकाशितेयं स्मारिका शास्त्रजिज्ञासूनामुपकाराय भूयादिति आशासे।

सज्जनविधेयः

श्रीजय–मिथुन–कृष्णैकादशी
23–06–2014

परमेश्वर नारायण शास्त्री
(प्र.) प्राचार्यः
श्री रणवीर परिसर,
कोट–भलवाल, जम्मू

शाक्ते राष्ट्र एधतां शैवम्

हिमालयेषु मुकुटायमानं राराष्टि जम्मूकाश्मीरराज्यम् । काश्मीराश्च शोभन्तेतमां शास्त्राङ्गणे । किञ्च साहित्यशैवदर्शनयोर्नाम्नोर्गृहीतयोरादौ स्मृतिपटलं स्पृशन्ति काश्मीरा विद्वांसः । तथा हि तेषामनुत्तमं वैभवं दरीदृश्यते । ज्ञानपिपासून् बहून् आचकर्ष राज्यमेतत्प्राक् । आचार्यशङ्कर रामानुजाचार्यादयोऽत्र समेत्य पवित्रधरामिमां प्राणमन् । एतस्मादेव राज्याद् रामानुजोऽनुपमामलभ्याञ्च बोधायनसूत्रवृत्तिं प्रापेत्यत्रेतिहासः साक्षी । धरणीतलेऽस्मिन् शाक्ते शैवदर्शनस्य प्रवर्तनमभितरामजायत । सुतरां विशिष्यन्ते शैवदार्शनिकाः कृतिनोऽतुलनीयाभिः कृतिभिः । तेषां निशितमतेर्भक्तेर्वैदुष्यस्य च पराकाष्ठा ह्यनुभूयेत कृतिभिस्तदीयाभिः। नेदं परोक्षं किन्तु प्रत्यक्षं खलु ।

रघुकुलोद्भूतै रामभास्करवंशावतंसैर्महाराजैः परमवैष्णवैरत्र राष्ट्रे शैवदर्शनं समवर्धीति नतरां वक्तव्यमवशिष्यते । तादृशि राज्ये तद्दर्शनपरिचर्चा सङ्गच्छते हि नूनम् । उद्देशश्च परिपूर्यते राष्ट्रियसङ्गोष्ठीसमायोजनेन । गोष्ठ्यामस्यां नानाप्रान्तेभ्यो विद्वन्मतल्लिकाः समन्वीय शोभां समवर्धयन् शैवदर्शनविचारवैखरीभिर्मिथः शास्त्रार्थैश्च ।

ऐषमो व्यावहारिकसंवत्सरे मार्च् इत्यभिख्ये मासि 19 तः 21 पर्यन्तं प्रवृत्तायामस्यां राष्ट्रियविचारगोष्ठ्यां नानाशास्त्रचणैरुपस्थापितान् विषयान् सङ्गृह्य सम्प्रति ग्रन्थरूपेण प्रकाश्यते । एतस्मिन्नुद्यमे भृशं परिश्रम्य वैदुष्येण सर्वान् समानन्द्य प्रकाशनकर्मणि व्यापृताभ्यां गोष्ठीसाफल्यनिदानाभ्यामाचार्यमनोजकुमारमिश्र–विद्यावारिधिसतीशकुमारकपूरवर्याभ्यां स्वशास्त्रे शास्त्रान्तरे कृतश्रमाभ्यां शास्त्रविनयसम्पन्नाभ्यां साशीर्वादं साधुभणितिं प्रशास्महे । अस्मिन्कर्मणि साह्यमाचरितवद्भ्यः सर्वेभ्यो धन्यवाचं व्याहरामः ।

एतस्मिन् शास्त्रव्यापारेऽस्मान् सम्प्रवर्त्य प्रोत्साहितवद्भ्यः पदवाक्यप्रमाणपारावारीणेभ्यो वेदमूर्तिभ्यः संस्थानकुलपतिभ्यो विद्यावारिधि–नावल्पाक्काभिजन–रामानुजकृष्णताताचार्येभ्यः कण्णन् इत्यभिधया ख्यातेभ्यः सनति कार्तज्ञ्यं समर्पयामः । संस्थानकुलसचिवेभ्यः प्रशासनदक्षेभ्यः डॉ. बिनोदकुमारसिंहवर्येभ्य इतरेभ्यश्च तत्कृतं साहाय्यं स्मारं स्मारं कृतज्ञतावचांसि निवेदयामः ।

अशेषविघ्नशमनोऽनीकेश्वरोऽव्यादिति शम् ।

श्रीजय–मिथुन–कृष्णैकादशी

23–06'2014

इत्थं विदां वचनकरः

रामानुजदेवनाथः

प्राचार्यः

निवेदनम्

अप्रतिहतवैदुष्यवेषः शारदादेशो हि नाम काश्मीरप्रदेशः। सारस्वतसाधनायां काश्मीरविदुषां योगदानं खल्वद्वितीयमिति नितरामतिरोहितं तावद्वाङ्मयपर्यालोचनविलोचनानां विद्वच्चणानाम्। केसरकुङ्कुमाभिख्या–विख्याताात्मिकायां हि काश्मीरवसुधायामुज्जृम्भमाणेषु विविधेष्वमूल्यमहानिधिषु विलासोल्लासभाजौ खल्वन्यतमाविमौ महानिधी–**काश्मीरशैवदर्शनं साहित्यशास्त्रं** चेति।

शैवदर्शन–साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां विदुषां महन्महद्योगदानं परिलक्ष्यते। सत्यपि तावच्छैवदर्शनसामान्ये काश्मीरशैवदर्शनं प्रातिस्विकं किमप्यनन्यरूपावच्छेदं सुतरां बिभर्तीति तन्नाम्नैव विश्रुतिमधिश्रितम्। तत्र सोमानन्दः, उत्पलदेवः अभिनवगुप्तः, आचार्यवसुगुप्तः, भट्टकल्लटप्रभृतयश्च दार्शनिका विद्वांसः काश्मीरशैवदर्शनस्य परमप्रामाणिकत्वमुपेयिवांसः। आधुनिकेष्वपि तावद् डॉ. बलजिन्नाथप्रमुखा विख्याताः काश्मीरशैवदर्शनविशेषज्ञाः।

अपरत्र च न केवलं काव्यशास्त्रपरम्परायामपितु काव्यप्रणयन–परम्परायामपि काश्मीरविदुषां योगदानमतुलनीयं विद्यते । तथाहि–

"सहोदराः केसरकुङ्कुमानां भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः।।"

तत्र भामह–वामन–उद्भट–रूद्रट–भट्टलोल्लट–भट्टशङ्कुक–आनन्दवर्धन–अभिनवगुप्त–कुन्तक–क्षेमेन्द्र–महिमभट्ट–रुय्यक–मम्मट–कल्हण–बिल्हण–जल्हणप्रभृतयः काव्यतत्त्वविशारदा अस्मिन्नेव शारदादेशे लब्धजनुषः।

शैवदर्शन–साहित्यशास्त्रपरम्परयोः संवर्धने संहितात्मनां समेषामेतेषां विदुषां तत्तत्कृत्यप्रवृत्तीनां च परिगणनं कदाचिदिह लघीयसि प्रस्तावनाप्रयासे समुद्रविन्दुवत्स्यादित्यतः तत्साकल्यगवेषणैकदृशा शास्त्रीय॰ष्ट्या तत्तच्छास्त्रनिष्णातानां विदुषां संनिधौ सुविचारणाय राष्ट्रिया सङ्गोष्ठी खलु काचित्परिकल्पनापथमानीता।

19.03.2014 दिनाङ्के वाणीविलाससभागारे जम्मूकाश्मीरप्रान्तस्य माननीयराज्यपालानां श्रीएन्.एन्.वोहरामहाभागानां मुख्यातिथित्वे, राष्ट्रियसंस्कृतसंस्थानकुलपतीनां प्रो. एन्. आर. कण्णन्महोदयानामाध्यक्ष्ये च शैवदर्शनसाहित्यशास्त्रपरम्पराविषयात्मिकायास्त्रिदिवसीय– राष्ट्रियसङ्गोष्ठ्या उद्घाटनसमारोहः खलु समुल्लसति स्म । समारोहेऽस्मिन् पद्मश्री–प्रो. वेदकुमारीघईमहाभागाः सारस्वतातिथिपदं, राष्ट्रपतिसम्मानिताः प्रो. विश्वमूर्तिशास्त्रिमहोदयाश्च विशिष्टातिथिपदमलङ्कृतवन्तः। दिवसत्रयव्यापिन्यां सङ्गोष्ठ्याममुष्यां समाहृत्य पञ्चदश सत्राणि प्रावर्तन्त द्वे सत्रे समुद्घाटनसमापनात्मनी शोधपत्रप्रस्तुत्यात्मानि च त्रयोदशेति।

21.03.2014 दिनाङ्के परिसरस्य तदानीन्तनप्राचार्याणां प्रो. परमेश्वरनारायण–शास्त्रिवर्याणामध्यक्षतायां लालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठस्य कुलपतिचराणां प्रो. रमेशकुमारपाण्डेय महाभागानां मुख्यातिथित्वे च राष्ट्रियसङ्गोष्ठीयं सम्पन्नतामध्यतिष्ठद् यत्र खलु प्रो. श्रीधरवशिष्ठमहोदयाः सारस्वतातिथिपदं, उच्चशिक्षानिदेशकचर्यः प्रो.नलिनीकोहलीमहाभागाश्च विशिष्टातिथिपदमलमकुर्वन् । भारतवर्षस्य विविधप्रान्तेभ्यः परश्शतमभ्युपेयिवांसो विद्वांसो दिवसत्रयप्रसरेषु त्रयोदशसु सत्रेषु षडुत्तरैकशतं शोधपत्राणि प्रस्तुवन्तोऽमुष्या राष्ट्रियसङ्गोष्ठ्या अनुष्ठानसाफल्यं पर्यकल्पयन्।

तेषामेव शोधपत्राणां सङ्ग्रहमात्मसात्कुर्वन् "शारदायनम्" इति नाम बिभ्रद् ग्रन्थोऽयं सम्प्रति प्रकाशनपथमानीयते। प्रकाशनात्मनि कर्मण्यस्मिन् यथायथं प्रविभज्य षष्टिः शोधपत्राणि विनिवेशितानि येषु खलु काश्मीरशैवदर्शनमधिकृत्य सप्तविंशतिः, साहित्यशास्त्रमधिकृत्य च त्रयस्त्रिंशच्छोधपत्राणि वर्तन्ते। संस्कृतं, हिन्दी, आंग्लं चेति भाषात्रितयी त्रिवेणीवेह पुण्यसङ्गममातनोति। "शैवदर्शन–साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां योगदानम्" इति विषयानुगुण्येन तावदुभयोरपि शारदादेशानुबन्धनश्रियमनुध्याय, शारदादेशमिव हृदि निधाय च प्रकाश्यमानस्य शोधपत्रसङ्ग्रहात्मनो ग्रन्थस्यास्य "**शारदायनम्**" इति नाम विहितम्।

प्रथमं तावदनुमतिप्रदानेन आराष्ट्रियसङ्गोष्ठया आग्रन्थप्रकाशनं कृत्यप्रवष्त्यात्मकमुत्साहं सञ्चारितवद्भ्यःसंस्थानकुलपतिभ्यो डॉ. एन्. आर. कण्णन्महोदयेभ्यः, संस्थानकुलसचिवेभ्यो डॉ.विनोदकुमारसिंहवर्येभ्यश्च कृतज्ञतां विज्ञापयामः।

सौभाग्यास्पदमिदं यत्प्रकाश्यमानोऽयं ग्रन्थः प्राचार्यद्वयीसाम्मुख्यसौख्यानि निर्विशतीति। सौमनस्यप्रतिमूर्त्तीनां तदानीन्तनप्राचार्याणां प्रो. परमेश्वरनारायण–शास्त्रिणां पुरस्तात् प्रवष्तप्रकाशनस्यास्य ग्रन्थस्य सम्पन्नताक्षणे साक्षिणो विविधविद्याविद्योतितान्तःकरणा वर्तमानाः परिसरप्राचार्याः प्रो. रामानुजदेवनाथन्महाभागाः प्रतिपदमुत्साहवर्धनैराशीर्वचोभिः खलु निर्विघ्नताश्रेयांसि समुल्लासयन्ति।

आद्योपान्तं प्रवर्तमानेऽस्मिन्नुपक्रमे प्रत्यक्षं परोक्षं वा यस्मिन् कस्मिन्नपि रूपे साहाय्यं प्रथितवद्भ्यः सर्वेभ्यः सहृदयेभ्यः सुहृद्भ्यो हार्दिका धन्यवादा वितीर्यन्ते।

सुव्यवस्थितमुद्रणार्थं न्यू.आर.के.प्रिंटर्स्–प्रकाशकोऽपि खलु धन्यवादार्हः ।

सम्पादकौ

प्रो० मनोज कुमार मिश्रः
वेदविभागाध्यक्षः

डॉ० सतीश कुमार कपूरः
साहित्यविभागाध्यक्षः

काश्मीरशैवदर्शनस्य शैक्षिकमहत्त्वम्

डॉ. विजयपाल कछवाह
असिस्टेंट प्रोफेसर
श्री रणवीर परिसरः, जम्मूः
शिक्षाविभागः

शिवस्य रुद्रस्य वा उपासना वैदिककालतः प्रचलिता वर्तते। यजुर्वेदस्य शतरुद्रीयाध्यायः प्रसिद्धोऽस्ति। तैतिरीयारण्यके इमं सम्पूर्ण विश्वं रुद्ररूपं मनुते श्वेताश्वेतरादिशु उपनिषत्सु महाभारते पुराणेषु च एतस्य महिमा मण्डिताऽस्ति। शैवसम्प्रदायस्य मूलग्रन्थः शैवागम इत्युच्यते । श्रीकण्ठेन एतानि आगमशास्त्राणि वेदवत् मन्यन्ते। माधवाचार्येण शैवसिद्धान्तचतुष्ट्यस्य वर्णनं क्रियते। यथा – नकुलीश – पाशुपत शैव प्रत्यभिज्ञा रसेश्वरूच कापालिककालामुखश्च द्वयोः मतयोः उल्लेखः कृतः यामुना चार्येण ।

काश्मीरशैवमतस्यापरं नाम प्रत्यभिज्ञादर्शनं त्रिकदर्शनमप्युच्यतें स्वातन्त्र्यवादः ईश्वराद्वयवादः शिवाद्वैत नाम्ना 2 विख्यातोऽयम् । काश्मीर शैवदर्शनस्य मूलं तन्त्रं शैवागमोवा उच्यते दार्शनिक रीत्या शिवसूत्रमस्य दर्शनस्य आधार सूत्रमस्ति। येभ्यः एषा प्रसिद्धिः वर्त्तते यत् स्वप्नकाले आचार्यविसुम् एतस्य प्राप्तिर्ज्ञाता । वसुगुप्तस्य अष्टमशताब्द्याः स्पन्दकारिका सोमानन्द नवमशताब्द्याः विश्वदृष्टिः, उप्पलदेवस्य दशमशताब्द्याः पूर्वाधप्रत्यभिज्ञाकारिका, अभिनवगुप्तस्य दशमशताब्द्याः उतरार्धप्रत्यभिज्ञ विमर्शिनी, परमार्थसारः तन्त्रालोकः, क्षेमराजस्य शिवसूत्रविमर्शिनी स्पन्दसन्दोहश्च अस्य सम्प्रदायस्य एते महत्वपूर्णग्रन्थाः वर्तन्ते।

मतेऽस्मिन् परमतत्वम् अद्वयशिव एव यः परमेश्वरः परमात्मा, परमशिवः अनुत्तरादि नाम्ना विख्यातः वर्तते। परमात्मतत्व प्रभावेनैव शुद्धचैतंन्यः शिवः किन्तु चेतन्योऽयम् अद्वैतवेदान्त सदृशः ज्ञातृ – ज्ञेय विषयिविषयरहितत्वं क्रियाशून्यत्वं नास्ति। चैतन्यं चित्तं सर्वदा शक्तिस्वरुपा, आत्मचेतना, आत्मस्वातन्त्र्यंस्य आनन्दस्य स्वाभाविकप्रकटनं भवति। अस्य

दर्शनस्य विशेषता चैतन्यस्वरुपपरमतत्वमेव शक्तिस्वरुपा मनुते । परमशिवः शक्तिस्वरुप अतः द्वावपि पृथक् न तिष्ठति। यथा – चन्द्र चन्दिकयोः मध्ये भ्ेदः दृश्यते । शिवः प्रकाशस्वरुपः शक्तिः विमर्शरुपाञ्च। यथा शिवशक्तयो मध्ये पार्थक्यं न दृश्यते तथैव प्रकाशविमर्शयोः मध्येऽपि अभेटः दृश्यते शिवः एकेन साकं ज्ञान–ज्ञाता–ज्ञेयश्च वर्तते, एषः सामान्यतया सविकल्पकबौद्धिक ज्ञान–ज्ञाता–ज्ञेयस्य त्रिपुटी न, अपितु निविकल्पकापरोक्ष ज्ञानं वर्तते यत् शुद्धात्मा चैतन्यस्वरुपं भवतिं यस्मिन् ज्ञाता–ज्ञेयाभिन्नं भवति। शक्तिं विना शिवः शव सदृशः यतोहि एतां विना शिवे स्पन्दनं न भवति। सन्दर्भेऽस्मिन् आचार्यवसुगुप्तेनोदं यथा –

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम् ।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।। 1 ।।

जगत् जीवश्च शिवमयः सृष्टिः शिवस्य विलासरुपा वर्तते। शिवः स्वचितशक्त्या स्वातन्त्र्यानन्दकारणेन विविधरीतया प्रकटितः जायते। अतः स्वात्मानं विविधरुपेशु प्रकटयति शिवः स्वातन्त्रयकारणात्। अनेन स्वतन्त्रत्वेन तेन सृष्टि–स्थिति–संहार–निग्रहानुग्रहस्य च पऽचकृत्येषु प्रवृत्तः जायते। विचित्र–संहारस्य लीला प्रचल्यमाना वर्तते। परमशिवः स्वान्तः स्वकीयेन स्वस्योऽपरि एतेषां विचित्रविश्वाभांसाणाम् उन्मीलनं क्रियते। एतस्य कृते तेन कस्यापि उपादन मित्तेः आधारस्य वा आवश्यकतानानुभूयते। क्रमेऽस्मिन् वसुगुप्तमहोदयेनो यथा –

निरुपादनसम्भारमभितावेव तन्वते ।
अगच्चित्रं नमस्तमै कलानाथाय शूलने ।। 2।।

षट्त्रिशततत्वानि स्वीकृतानि प्रत्यभिज्ञादर्शने। एते त्रिभागेषुः विभक्ताः सन्ति। यथा – शिवतत्वं – विद्यातत्वमात्मतत्वं च। शिवतत्वे शिवः शक्तिश्च विद्यातत्वे– सदाशिवः ईश्वरः शुद्धविद्या च, एतानि पऽचतत्वानि शुद्धाध्वा शुद्धसृष्टिः वा उच्यन्ते। अत्र अभेदस्यानुभूते स्वरुपस्य ज्ञानं च निर्मीयते परमशिवेन । एतानि पडचतत्वानि क्रमशः परमशिवस्य चित्तानन्द–इच्छा–ज्ञान–क्रियाश्च पडचप्रमुख–शक्तिभिः प्रकट्यन्ते। अहम् इदम् उभयोः चिद्रुपात्मकाभिन्ना अनुभूति भवति, अतः शिवः सम्पूर्णजगत् आत्मानं वैभवं मनुते । यथा –

सर्वो ममायं विभवः ।। इति । 3 ।।

आत्मतत्त्वे (31) एकत्रिंशततत्वानि स्वीकृतानि (16) माया (7) कला (8) विद्या (9) रागः (10) कालः (11) नियति (12) पुरुषसंज्ञकतत्वशेषः सांख्यसम्मत (24) चतुर्विशति–तत्वानि (13) प्रकृतिः तथा उत्पन्नानि (23) त्रिविंशतितत्वानि, येषु (14) महत् (15) अहंकारः (16) मनस् (17–21) पडचज्ञानेन्द्रियाणि (22–26) पडचकर्मेन्द्रियाणि (27–31) पञ्चतन्मात्राणि (32–36) पञ्चमहाभूतानि आगतानि । एतानि प्रत्यभिज्ञादर्शनस्य षड़त्रिशत्तत्वानि (36) सन्ति।

सम्पूर्णविश्वमिदं शिवचैतन्ये इच्छाशक्तेः सदृशम् अवस्थितम् तथा वाह्यजगतरुपेण आभासितः जायते। जगतः वाह्यस्वरूपमपि चैतन्यम् अतः कोऽपि जड़पदार्थः नास्ति एवञ्च शिवचैतन्यस्य बर्हिभिन्नो वा न भवितुं शक्नोतिं अद्वैतवेदान्तबौद्धविज्ञानवाद–प्लेटो–बर्कले इत्यादिभिः । विज्ञानवादिभिः जड़–जगत् चैतन्यस्य आभास एव स्वीक्रियते। काश्मीरशैवदर्शनं विश्वं शिवचैतन्य–स्वातन्त्र्यकारणेन स्वान्तः स्वस्योऽपरि उपादानं विना प्रक्षिप्तामासः मनुते । अद्वैतवेदान्त–बौद्धविज्ञानस्य समानः स्वप्न–भ्रम पदार्थाणामुदाहरणेन आभासवादस्य पुष्टिः क्रियते प्रत्यभिज्ञादर्शनम्। आत्मा स्वतात्त्विक शिवरुपेण पूर्णशक्ति सम्पन्ना जायते, अतः तस्याः चितानन्द–इच्छा–ज्ञान–क्रियाशक्त्यश्च स्वपूर्णतां भजते। आत्मनः स्ववास्तविकशिवरुपस्याज्ञानं बन्धनं स्ववास्तविकस्वरुपस्य पूर्णचिदानन्दलाभः मोक्षश्च उच्यते। अज्ञानस्यार्थः ज्ञानाभावः न अपितु अपूर्णाज्ञानं भवति। ज्ञानशक्तिरुपा। अतः शक्तेः अपूर्णता बन्धनम्, एतस्याः पूर्णता मोक्षश्च स्वीक्रियते। मायाः तस्याः पचकचुकप्रभावैः आत्मनः शक्तयः अवृत्ताः जायन्ते तथा आत्मा ससीमापूर्णज्ञानशक्तियुक्तपुरुषः पशुः निर्मति। अज्ञानाणवमलः एषः यः कार्मणि– मायीय–मलानामाधारः वर्तते। अवसरेऽस्मिन् तन्त्रालोके उक्तं यथा –

मलमज्ञानमिच्छन्ति संसाराङ्कुकारणम् ।। 4 ।।

काश्मीरशैवदर्शनस्यापरं नाम प्रत्यभिज्ञादर्शनम् । एतस्याधारमूतसिद्धान्तः वर्तते। प्रत्यभिज्ञा मोक्षसाधनं स्वयं मोक्षरुपमस्ति। प्रत्यभिज्ञायाः अर्थः अभिज्ञानम् अथति् स्वविस्मृस्वरुपस्याभिज्ञानं प्राप्तम्

च। एषा स्मृति–प्रत्यक्षज्ञानाम्यां भिन्न तथा उभयोः समन्वितरुपाश्च वर्तते। परमतत्वे शिवशक्तिसामरस्य सदृशः स्मृति–प्रत्यक्षयोः सामरसः प्रत्यभिज्ञायाम्।

एतस्याः कृते चत्वारि तथ्यानि प्रमुखानि सन्ति। यथा –

प्रथमः– प्रत्यभिज्ञात् वस्तुनः व्यक्तेः वा पूर्वज्ञानमावश्यकं भवति पूर्वज्ञानाय वस्तुनः पूर्वदृष्ट–भवितमावश्यकं न अपितु तस्य पूर्वश्रुतं दृष्टं चानिवार्य प्रतिभाति।

द्वितीयः– पूर्वज्ञातवस्तुनः व्यक्तेः वा साम्प्रतिककाले अस्माकं समक्षे उपस्थितिः प्रत्यक्षज्ञानमनिवार्यं वर्तते ।

तृतीय :– पूर्वज्ञातवस्तुनः व्यक्तेः वा अस्माकं मनसि स्थितसंस्काराणां वर्तमाने अवलोक्य उत्पन्नं जातम् ।

चतुर्थः– एतेषां पूर्वज्ञानव्युत्पन्नसंस्काराणां साम्प्रतिकोत्पन्नप्रत्यक्षज्ञानेन साकं तादात्म्यीकरणमावश्यकं वर्तते। अनेन तादात्म्यीकरणेन उत्पन्नं ज्ञानं यत् वस्तु व्यक्तिः वा स एव यस्य माम् पूर्वज्ञानमासीत् एषा एव प्रत्यभिज्ञा भवति। लौकिकोदाहरणेनापि अस्य दर्शनस्य भावः स्पष्टीक्रियते। यथा – एका नवयुवती कस्यापि व्यक्तेः गुणानां श्रवणेन तस्मिन आसक्ता जाता । सा प्रेमपत्रं विलिख्य स्वविश्वस्तदूतीमाध्यमेन तस्य पार्श्वे प्रेषयति, एवञ्च तं स्वनिकटे मेलनाय आह्वयति। सः मानवः तस्य निकषे आगच्छति, नवयुवती तमावलोक्य सामान्यजनं मत्वा नामिज्ञापयति, किन्तु दूती यदा तस्य परिचयं कारयति तदा सा तमभिज्ञाय आनन्दमग्ना भविता। 5 ।।

एवं प्रकारेण कस्याः कामिनीइत्यस्याः पूर्वदृष्टप्रियतमः प्रवासीपतिः वा छद्मवेशावस्थायां तस्याः निकषे आगच्छति, तेन साकं सा मिलति किन्तु तं नाभिज्ञाय आनन्दस्यानुभवे न भवति, परन्तु तस्य व्यक्तेः यदा स्वरुपलक्षणं प्रकटयति तदा सा तमाभिज्ञाय आनन्दिता जाता । तत् त्वमसि महावाक्यमेतत् दर्शनं प्रत्यभिज्ञया एव प्रकाश्यते। मायायाः अपूर्णज्ञानात् पुरुषेण आत्मानमपूर्णशक्ति सम्पन्नं ससीमात्मां मन्यते, एवञ्च स्वशिवस्वरुपस्य विस्मृतिः जायते। यदा गुरुः तमोपदिशति यत् त्वमेव शिवः तस्य श्रवणाध्ययनाम्यासेन बौद्धिकज्ञानमुत्पन्नं शिवस्यानुग्रहः गुरोः दीक्ष स्वयं साधनया अपरोक्षानुभूतौ प्रत्यभिज्ञायां पौरुषज्ञाने वा

परिवर्तयते।

एतेन वास्तविकशिवस्वरूपं चिदानन्दं चिति–शक्तेः पूर्णस्वातन्त्र्यमानन्दं व प्राप्यते। एषा एव मुक्तिः मोक्षो वा वर्तते। तन्त्रालोके उक्तञ्च –

पौरुषं पुनर्ज्ञानमुदितं सत् अन्यनिरपेक्षमेव मोक्षकारणम् इति।। 6 ।।

जीवनमक्तिं स्वीकरोति प्रत्यभिज्ञादर्शनम्। पौरुषज्ञानेन शिवरुपज्ञानेन वा अज्ञानरुपी–आणवमलस्यापसारणं जायते। ततः प्राप्यते जीवन्मुक्तस्याशेषानन्दात्मकानुभूतिः । यस्मात्स्फुरत्मखिलमभेदात्मकं शक्तिशिवयोः। तस्मादुपलभ्यते शिवात्मकस्याद्वैतानन्दोपलब्धिः । अत एव उक्तञ्च शास्त्रे –

अखिलमभेदेनैव स्फुरति ।
तस्मादनेकभावाभिः शक्तिभिस्तद्भेदतः ।
एक एव स्थितः शक्तिः शिवः शिव एव तथा तथा ।। 7 ।।

सन्दर्भग्रन्थसूची –

1) भारतीय दर्शन–आलोचना और अनुशीलन–चन्द्रधर शर्मा।
2) स्पन्दकारिका, काश्मीर ग्रन्थाग्रवली, श्रीनगर, वसुगुप्त।
3) ईश्वर प्रत्यभिज्ञाविमर्शिनी भाग 1–2 (कारिका टीका) क्षेमराज कृत, काश्मीर ग्रन्थावली ।
4) प्रत्यभिज्ञा–हृदय–टीकाकार सम्पा जयदेव सिंह, मोतीलाल वनारसीदास ।
5) काश्मीर शैव दर्शन 1973, बलजिननाथ पण्डित ।
6) काश्मीर शैव दर्शन मूलसिद्धान्त, कैलाशपति मिश्र, अर्द्धनारीश्वर प्रकाशक वाराणसी ।

शब्दशक्तिसिद्धान्तविकासे काश्मीरीयं योगदानम्

डॉ. सुज्ञान कु.महान्तिः
राष्ट्रियसंस्कृतसंस्थानम्,
वेदव्यासपरिसरः,
बलाहरम्, हि.प्र. 177108

कश्मीरं खलु सारस्वतसाधनायाः तपोभूमिः। दर्शनशास्त्राणां साहित्यशास्त्रस्य च विकासपरम्परायां कश्मीरीयविदुषामनवद्यश्रमराशिः सुरसरस्वतीवाङ्भयसमृद्धिसम्पादने किमप्यद्भुतमेव स्थानमावहति। तत्र च यथा काश्मीरीयशैवदर्शनसिद्धान्तानां तथा अलङ्कारशास्त्री-यतत्त्वानामाविष्कारे विकासे समुल्लासेऽपि अनन्यसाधारणवैशिष्ठ्यं भजते कश्मीरभूमिः।

सम्प्रतिसमुपलब्धेषु अलङ्कारशास्त्रीयतत्त्वरत्रेषु तद्वाहकेषु च ग्रन्थरत्नाकरेषु समुज्ज्वलहीरकाणि अस्मिन्नेव कश्मीरभमिभागे देदीप्यन्ते, येषु भामहोद्भटवामनरुद्रटभटानन्दवर्धनभट्टलोल्लटश्रीशङ्कुकाभिनवगुप्त-मुकुलभट्टभट्टतोतकुन्तकमहिमभट्टक्षेमेन्द्रमम्मटकल्हणविल्हणजल्हणरुय्य कशारदाननयशिङ्गभूपालप्रभृतयो मनीषिणः प्रामुख्यं भजन्ते। भारतोत्तोरकाले अलङ्कारशास्त्रीयित्त्वानां विकासः पारेसहस्त्रं वर्षाणि यावत् मुख्यतया काश्मीरभूमावेव समजनि। अलङ्कारशास्त्रे विकसिताः प्रसिद्धाः प्रायः सर्वेऽपि सम्प्रदायाः काश्मीरभूमावेव जनिं लेभिरे। अलङ्कारसम्प्रदायस्य स्रष्टाः भामहः, रीतिसम्प्रदायस्य जनकः वामनः, ध्वनिसम्प्रदायस्य उद्भाता आनन्दवर्धनः, वक्रोक्तिसम्प्रदायस्य प्रणेता कुन्तकः, औचित्यसम्प्रदायस्य प्रतिष्ठाता क्षेमेन्द्रश्च कश्मीरादेव प्रादुर्बभूबुः।

शब्दार्थशरीरं काव्यस्येति न कस्यापि विपश्चितो विमतिः। अस्ति च शब्दार्थयोः कश्चित् सम्बनविशेषः। स च सम्बन्धः शक्त्या एव निरूपितः। सा च शक्तिः किं रूपेति जिज्ञासायां काव्यतत्त्वसमालोचकाः शब्दशक्तिविषये चिन्त्यामासुः। नवमेशवीयशतकोद्भवः आनन्दवर्धनः ध्वन्यालोके वाचकत्व-लाक्षणिकत्व (गुणवृत्ति) व्यञ्जकत्वानि शब्दार्थसम्बन्धनियामकत्वेन निरूपयति। तथाहि –

वाचकत्वाश्रयेणेव गुणवृत्तिर्निरूपिता ।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्[1] ।।

एतेन आचार्यस्य आनन्दवर्धनस्य अभिधालक्षणव्यञ्जनात्वेन शब्दस्य शक्तित्रयमभिमतमासीदिति स्पष्टम्। शब्दार्थयोः यः प्रसिद्धः सम्बन्धोऽसौ वाच्यवाचकरूपः (अभिधा) इति तन्मतम्। तदुक्तम्–

तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः।
बहुधा व्याकृतः सोन्यैः काव्यलक्ष्मविधायिभिः[2] ।।

मुख्यवृत्तेरभिधायाः बाधे सति शब्दार्थयोः यः गौणः सम्बन्धोऽसौ गुणवृत्तिः, भकितः, लक्षणा वेति तेन न्यगादि । तदुक्तम्– मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्[3] इति। काव्यचारुत्वहेतुभूतः प्रतीयमानार्थः व्यङ्ग्यार्थो वा एतद्वृत्तिद्वयव्यतिरिक्तया व्यञ्जनाशकत्या[4] प्रतीयते यथा आनन्दवर्धनस्य ध्वनिसिद्धान्तः आश्रितोऽस्ति। प्रतीयते यया आनन्दवर्धनस्य ध्वनिसिद्धान्तः आश्रितोऽस्ति।

परं मुकुलभट्टस्य शब्दशक्तिविषयका विचारा आनन्दवर्धनस्य तद्विषयकविचारापेक्षया सर्वथा भिन्नाः। आनन्दवर्धनेन शब्दशक्तीनां नामानि वाचकत्वलाक्षणिकत्व(गुणवृत्तिः) व्यञ्जकत्वरूपेण तूक्तानि, पर तासां स्वरूपादिविषये स्पष्टतया किमपि नोक्तं, न वा तासां भेदानां गणना कृतास्ति। मुकुलभट्टो यद्यपि काश्मीरदेशजोस्ति, तथापि मीमांसादर्शनवासितधिया शब्दस्यैकामेव शक्तिं स्वीकरोति। लक्षणां शब्दस्य साक्षाच्छक्तित्वेन नासौ स्वीकरोति, परमभिश्वाया एव भेदत्वेन प्रतिपादयति । व्यञ्जनां तु नाम्नाप्यसौ न निर्दिशति। शब्दस्याभिधाख्य एकस्मिन्नेव व्यापारे सर्वमपि वाक्तत्त्वमन्तर्भवतीत्यसौ नियमयति। आदौ शब्दस्य मुख्यलाक्षणिकत्वेन भेदद्वयं प्रतिपाद्य लक्षणाया अर्थावसेयत्वं साधयति[5]। मुख्यमभिधाव्यापारं निरन्तराथ्रनिष्ठत्वेन तथा लाक्षणिकमभिधाव्यापारं सान्तरार्थनिष्ठत्वेनासौ प्रतिपादयति [6]। स्वार्थाभिधानाय शब्दस्योपाधिनिबन्धनां प्रवृत्ति प्रतिपादयता मुकुलभट्टेन जाति–गुण–क्रिया–यदृच्छात्वेन[7] मुख्यः अभिधाव्यापारः चतुर्धा व्याकृतः। प्रसङ्गतः जातिमात्रे शब्दानां प्रवृत्तिनिमित्तत्वं निरस्यासौ जात्यादिचतुष्टयपक्षं स्थापयति[8]। लाक्षणिकाभिधाव्यापारस्य शुद्धत्वेन उपचारमिश्रत्वेन[9] चादौ चादौ भेदद्वयं प्रतिपाद्य शुद्धायाः

उपादान–लक्षात्वेन[10] पुररपि द्वैविध्यं साधयति। उपचारमिश्रलक्षणायाः शुद्धोपचार–गौणोपचारभेदेन प्रथमं द्विधा विभज्य तयोः प्रत्येक सारोपासाध्यवसानत्वेन द्विधा कृत्वा चतुर्धा उपचारमिश्रा लक्षणा[11] । मुकुलभट्टेन अभिधायाः यथा उपाधिनिबन्धनत्वं प्रतिपादितं तथा लक्षणायाः अपि वक्त्रादिनिबन्धनत्वं प्रतिपादितम्। तदुक्तम्–

वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्।
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषीभिः[12] ।।

आचार्यमुकुलभट्टस्य शब्दशक्तिविषयका इमे विचारा तदुत्तरवर्त्ति–काव्यशास्त्रिभिः उपजीव्यत्वेन स्वीकृत्य नैजग्रन्थरचनापरिपाको विहितः। विशिष्य काव्यप्रकाशकारेण आचार्यमम्मटेन स्वीयाः शब्दवृत्तिविषयकाः सिद्धान्ता मुकुलभट्टप्रणीतसिद्धान्ताननुसृत्यैव शब्दव्यापारविचारे काव्यप्रकाशे प्रतिष्ठापिताः सन्ति।

महिमभट्टः शब्दस्यैकेवाभिधा शक्तिरिति वदति। तदुक्तं तेन–शब्दः पुनरनुपादेय एव । तस्य स्वार्थाभिधानमन्तरेण व्यापारन्तरानुपपत्तेरुपपादयिप्यमाणत्वात्[13]। अन्यत्र तेनैवोक्तं शब्दः पुनः स्वार्थाभिधानमात्रव्यापार–पर्यवसितसामर्थ्यो नार्थान्तरस्य तटादेर्वार्तामपि वेदितुमुत्सहते[14]। शब्दस्यानेकशक्तिनिराकरणप्रस्तावेऽसौ वदति यद् एकाश्रयानेकशक्तयः युगपदेव स्वकार्यमुत्पादयन्ति। तदुक्तं तेन–'यत् पुनरस्यानेकशक्तिसमाश्रयत्वाद् व्यापारान्तरपरिकल्पनं तदर्थस्यैवोपपद्यते न शब्दस्य, तस्यानेकशक्तिसमाश्रयत्वासिद्धेः। तथा हि एकाश्रयाः शक्तयो अन्योन्यानपेक्षप्रवृत्तयोऽप्राकृतपौर्वापर्यनियमाः युगपदेव स्वकार्यकारिण्यो दृष्टाः यथा दाहकत्वप्रकाशकत्वादयोऽग्रेः। न च शब्दाश्रयाः शक्तयस्तथा दृश्यन्ते, अभ्युपगम्यन्ते वा, नियोगतोऽभिधाशक्तिपूर्वकत्वे नेतरशक्तिप्रवृत्तिदर्शनात्। तस्मादिभन्नाश्रया एव ता न शब्दैकसामश्रया इत्यवसेयम्[15]। इत्येवं प्रकारेण युगपत्कार्यकारित्वाभावेऽनेकशक्तीनामेकाश्रयत्वाभावात् शब्दस्यैकाऽभिधैव शक्तिरिति सिद्धान्तितम्। अथ च वाच्यातिरिक्तानामर्थानामविनाभवा–वसायपूर्वकत्वान्नियतधर्मिनिष्ठवाच्चानुमानान्तर्भावत्वं साधितं तेनं

काश्मीरीयालङ्कारिकेषु आचार्यमम्मटस्य स्थानं तु कौस्तुभमणिरिव रत्नाकररत्नजातेषु। अत एवासौ वाग्देवतावतार इत्युच्यते काव्यशास्त्रपरीक्षकैः। यद्यपि मम्मटस्य शब्दशक्तिसिद्धान्तप्रासादः

मुकुलभट्टप्रणीतभित्तिभूमिमाधारीकृत्य वर्तते, तथापि मम्मटविकसितपथि तदुत्तरवर्तिनः आचार्याः सौकर्येणानुगन्तुं प्राभवन्। तेन वाचक–लाक्षणिकव्यञ्जकत्वेन शब्दस्य भेदत्रयं प्रतिपाद्य, वाच्यलक्ष्य–व्यङ्ग्यत्वेन च तदर्थान् प्रतिपाद्यासौ अभिधा– लक्षणा– व्यञ्जनाख्याः तिस्रः शब्दशक्तयः निरूपिताः। तत्र शब्दः सङ्केतितार्थं बोधयितुं यं व्यापारमपेक्ष्यतेऽभिधा[16] नामासौ वृत्तिरिति तन्मतम्। मुख्यार्थस्य बाधे , मुख्यार्थ–लक्ष्यार्थयोः सम्बन्धे, रूढिप्रयोजनयोरन्यतरस्य च सद्भावे लक्षणा[17] नाम शब्दशक्तिरिति तन्मतं सर्वथा मुकुलभट्टसिद्धान्तमनुसरति। तद्यथा मुकुलेन "यस्य तु शब्दव्यापारगम्यार्थपर्यालोचनयावगमस्तस्य लाक्षणिकत्वम्. ...... "विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे" इति न्यायात्"[18] इति। "लक्षणारोपिता" क्रिया इत्युक्तवतो मम्मटस्य मतानुसारं लक्षणा अर्थव्यापार इति यत् पुतरस्यानेकशक्तिसमाश्रयत्वाद् व्यापारान्तरपरिकल्पनं तदर्थस्यैवोपपद्यते न शब्दस्य"[19] इति महिमभट्टदर्शितसरणिमनुसरति। मम्मटोक्ता लक्षणायाः षट्प्रकाराः (शुद्धो–पादान–लक्षण–सारोपा–माध्यवसानाः गौण–सारोपा–साध्यवसाने च) यद्यपि मुकुलभट्टसोपानगम्यास्तथापि मम्मटोक्तलक्षणाविषयकं मतं व्यञ्जनापर्यवसायित्वात्किमपि भिन्नमेवौचित्यं प्रतिष्ठापयति। अथ च मुकुलभट्टेन "गङ्गायां घोषः" इति शुद्धालक्षणलक्षणायाः अध्यारोपस्य, अध्यवसानस्य चेति त्रितयस्योदाहरणरूपेणोपन्यस्तम्। "गङ्गायां घोषः" इत्यादौ वितस्तानदीव्यावर्तनमात्रप्रतीतिस्थले शुद्धालक्षणलक्षणा, गङ्गासम्बन्धतटप्रतीतिस्थले अध्यारोपः, गङ्गात्वमात्रप्रतीतिस्थले गङ्गगाप्रवाहस्यात्यन्तसामीप्यबोधार्थं तु अध्यवसानमिति तन्मतसारः। मम्मटमतानुसारम् तु गङ्गासम्बन्धमात्रमेव लाक्षणिकप्रयोगप्रतिपादनप्रयोजनं शब्दशक्तिसिद्धान्तानां विकासे मुकुलभट–मम्मटानन्दवर्धनाभिनवगुप्तादीनां काश्मीरिविदुषां सिद्धान्ता एव तदुत्तरवर्तिकालेषु प्रायः सर्वैरिवाचार्यैः व्याकृताः उपवंहिताः पोषिताः वर्धितास्च। आभारतं व्यासैः विद्यानाथविश्वनाथाप्पय्यदीक्षितजगन्नाथाशाधरभट्टनृसिंहादिभिः काव्यशास्त्रिभिः काश्मीरविकसितशब्दशक्तिसिद्धान्तानेवानुसृत्य तद्विशयकानि मतानि प्रतिष्ठापितानि । एवमेव शब्दशक्तिसिद्धान्तविकासे काश्मीरीयं योगदानं विश्वस्मिन् विश्वे सर्वादृतरूपेणाख्यातम्।

1— ध्वन्यालोः 1/21
2— तत्रैव 1/3
3— तत्रैव 1/20
4— प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।। 1/4
यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।
तत्रैव 1/23
5— शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते।। अभिधावृत्तिमातृका 1/2
6— एवमयं मुख्यलाक्ष्यणिकात्मविषयोपवर्णनद्वारेण शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरन्तरार्थविषयः सान्तरार्थनिष्ठश्चा अभिधावृत्तिमातृका, पृ.6 ।
सं. डॉ. सुज्ञानकुमारमाहान्तिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2009
7— तत्रैव पृ.11–12
8— तत्रैव पृ, 26–27
9— शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता । अभिधावृत्तिमातृका /2
10— उपादानाल्लक्षणाञ्च शुद्धा सा द्विविधोदिता । अभिधावृत्तिमातृका/3
11— आरोपाध्यवसानभ्यां शुद्धगौणोपचारयोः।
प्रत्येकं भिद्यमानत्वादुपचारश्तुर्विधः।। अभिधावृत्तिमातृका/4
12— अभिधावृत्तिमातृका/6
13— व्यक्तिविवेकः, (शब्दखण्डनम्) पृ.16, सं.रेवाप्रसादद्विवेदी, चौखम्बासंस्कृतसंस्थान, वाराणसी 1971
14— तत्रैव (लक्षाखण्डनम्) पृ 119
15— तत्रैव (लक्षणाखण्डनम्),पृ.113–114
16— स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।।
काव्यप्रकाशः 2/7

17– मुख्यर्थवाधे तद्योगे रुढितोऽयं प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्मा लक्षणाऽऽरोपिता क्रिया ।।
तत्रैव 2/9

18– अभिधावृत्तिमातृका, पृ.6, सं. डॉ. सुज्ञानकुमारमाहान्तिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2009

18– व्यक्तिविवेकः (शब्दखण्डनम्) पृ. 113, सं. रेवाप्रसादद्विवेदी, चौखम्बासंस्कृतसंस्थान, वाराणसी, 1979

सन्दर्भग्रन्थसूची–

1– ध्वन्यालोकः दीधितिसंस्कृतहिन्दीव्याख्योपेतः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1979

2– अभिधावृत्तिमातृका मुकुलभट्टविरचिता (सुबोधिनीसंस्कृतवृत्त्या सङ्गमनीहिन्दीवृत्त्या च विभूषिता) सं. डॉ. सुज्ञानकुमारमाहान्तिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2009

3– व्यक्तिविवेकः, (शब्दखण्डनम्), पृ. 113, सं.रेवाप्रसादद्विवेदी, चौखम्बासंस्कृतसंस्थान, वाराणसी, 1979

4– काव्यप्रकाशः, डॉ. नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, संवत् 2042

प्रत्यभिज्ञाऽद्वैतवेदान्तदर्शनयोः साम्यवैषम्यविचारः

मंजुनाथ एस.जी.
सहायकाचार्य,वेदान्तविभागः
श्रीभगवानदास–आदर्श संस्कृत महाविद्यालयः
गुरुकुल कांगड़ी, हरिद्वारम्।

देवभूम्यां काश्मीरेऽस्मिन् प्रसिद्धमिदमद्वैतप्रतिपादकं प्रत्यभिज्ञादर्शनम्। शिवदृष्टिः इति नाम्नाप्रसिद्धस्य प्रत्यभिज्ञादर्शनस्याधारग्रन्थस्य लेखनेन सोमानन्दाचार्योऽस्य दर्शनस्य प्रवर्तकः इत्यामनन्ति दार्शनिकाः। तत्पश्चादुत्पलदेवलक्ष्मणगुप्ताभिनव–गुप्तादयोऽस्य दर्शनस्य प्रचारमकुर्वन्। एते सर्वेऽपि काश्मीरीया इत्यनेन प्रत्यभिज्ञादर्शनस्य प्रभावाधिक्यं काश्मीरदेशे आसीदिति वक्तुं शक्यते। ईश्वरप्रत्यभिज्ञाकारिका, ईश्वरप्रत्यभिज्ञावृत्तिः, ईश्वरप्रत्यभिज्ञाटीकादयः सन्तीमे ग्रन्थाः उत्पलदेवस्य।

इति प्रकटितो मया सुघट एष मार्गो नवः।
गुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा[1]।।

इति कथनेन ज्ञायते शिवदृष्टेः सारः एवास्तीश्वरप्रत्यभिज्ञाकारिकेति। कश्मीरस्य शैवाचार्येषु मूर्धन्यविद्वानस्ति सर्वशास्त्रविशारदोऽभिनवगुप्ताचार्यः। श्रीनरसिंहगुप्तविमलाख्यावस्य पितरौ[2], उत्पलदेव[3], लक्ष्मणगुप्त[4], शम्भुनाथाचार्याः[5], आसन्। तन्त्रालोकः, तन्त्रसारः परमार्थसारः, ईश्वरप्रत्यभिज्ञाविमर्शनी, ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीत्यादिदार्शनिकग्रन्थाः, परात्रिंशिकाविवृतिः, मालिनीविजयवार्तिकम्, ध्वन्यालोकलोचनटीका, नाट्यशास्त्राभिनवभारतीटीकेत्यादय साहित्यग्रन्था अस्य सुप्रसिद्धकृतयः सन्ति।

स्वच्छन्दतः सृजति संसृतिमीश्वरोऽयं,
भावान्विभावयति चात्मनि बिम्बरूपान्।
अद्वैतरूपविदितं नवतत्वमत्र,
साक्षात्कृतिं विशति तत्परमं समीहे[6]।।

इति कथनेनाद्वैतप्रतिपादकं प्रत्यभिादर्शनमिति स्पष्टमेव। तर्हि प्रत्यभिज्ञाद्वैतवेदान्तदर्शनयोर्मध्ये को भेदः इति विचारः। अस्त्यत्रोभयदर्शनयोः

प्रमाणप्रमेययोर्मध्ये कश्चन भेदः। यथा–प्रत्यज्ञानुमानशब्दाश्चेति त्रीणि प्रमाणानीति प्रत्यभिज्ञाः, प्रत्यक्षानुमानागमार्थापत्यनुपलब्धिभेदात् षट् प्रमाणानीति[7] वेदान्तिनश्चोपपादयन्ति।

शिवः, शक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्या, माया, कला, विद्या, रागः, कालः, नियतिः, पुरुषः, प्रकृतिः, बुद्धिः अहंकारः, मनः, पंचज्ञांनेन्द्रियाणि, पंचकर्मेन्द्रियाणि पंचतन्मात्राणि, पंचभूताश्चेति शिवावादारम्य भूम्यन्तं षट्त्रिंशत्तत्वान्यगीकुर्वन्ति प्रत्यभिज्ञाः। पारमार्थिकं तत्त्वमेकं ब्रह्मैवेति कथयन्तः प्रातिभासिकी सत्ता, व्यावहारिकी सत्ता, पारमार्थिकी सत्तेति च सत्तात्रैविध्यं प्रतिपादयन्ति वेदन्तिनः।

तद्यथा–

कालत्रये ज्ञातृकाले प्रतीतिसमये तथा।
बाधाभावात्पदार्थानां सत्त्वत्रैविध्यमिष्यते।।
तात्त्विकं ब्रह्मणः सत्त्वं व्योमादेर्व्यावहारिकम्।
रूपादेरर्थजातस्य प्रातिभासिकमुच्यते[8]।। इति

वेदान्तिनः सदेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम्[9] इत्यनेन श्रुतिवाक्येन ब्रह्मणोऽद्वितीयत्वं व्यवस्थापयन्ति। निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम् [10] इति श्रुत्या ब्रह्मणः निर्विशेषत्वं क्रियारहितत्वं च साध ायन्ति। किंच, सत्यं ज्ञानमनन्तं ब्रह्म[11], नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः[12] इत्यादिश्रुत्या ज्ञानस्वरूपं ब्रह्मणो लक्षणमिति कथयन्ति। अपि च ब्रह्मणः स्वप्रकाशत्वं साधयन्ति। यथा चिद्रूपत्वादकर्मत्वात् स्वयंज्योतिरिति श्रुतेः[12] इति। अत्र अविद्योपहितः ईश्वर एवं क्रियावान् भवति, न तु ब्रह्म ।

प्रत्यभिज्ञास्तु शिवः प्रकाशः विमर्शश्च, तस्मादस्मिन् ज्ञातृत्वं कर्तृत्वं चास्ति, सृष्टिस्थितिसहृतिनिग्रहानुग्रहाश्चेति पंचकृत्यानि भवन्त्यस्येति प्रतिपादयन्ति। यथा– तथाहि परमेश्वरस्य ह्ययमेवासाधारंणस्वभावो यत् सर्वदा सृष्ट्यादिपंचकृत्यकारित्वम्[14] इति। एतेषां मते ज्ञानमप्येका क्रिया । कर्तृत्वात् सः स्वतन्त्रः, कर्तृत्व नास्ति चेत् निक्रियत्वात् सः जडः भवति। परमेश्वर एवं परमार्थः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विमति[15]। इति श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते। यथा अकृत्रिमाहं विस्फुरणम् इत्युक्त्वा यदि निर्विमर्शः स्वादनीश्वरो जडश्च प्रसज्येत [16] इत्युच्यते क्षेमराजेन। विमर्श एव देवस्य

शुद्धे ज्ञानक्रिये यतः[17] इति परमेश्वरस्य उपाधिरहिता शुद्धज्ञानशक्तिः क्रियाशक्तिश्च 'विमर्श' इति नाम्नाभिधीयते।

अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रिया–फलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य प्रपंचस्योत्पत्तिः जडेन वा? सामान्येनानीश्वरेण चेतनेन वा भवितु न शक्यते। तस्मात्तेन तेन जगज्जन्मस्थित्यादिभावविकारतत्तद्भेदक्रियासहस्ररूपेण स्थातुच्छिोः स्वतन्त्रस्य भगवतो महेश्वरस्येच्छैव उत्तरोत्तरमुच्छूनस्वभावा क्रिया विश्वकर्तृत्वं बोच्यते। यथा योगी स्वेच्छामात्रेण घटादिकं निर्माति तथोपादानं विना परमात्मा प्रपंच प्रपंचते इति प्रत्यभिज्ञाः प्रतिपादयन्ति। तत्र

योगिनामिच्छया यद्वन्नानारूपोपपत्तिता।
न चास्ति साधनं किंचिन्मृदादीच्छां विना प्रभोः[18]।
निरुपादानसंभारमभित्तावेव तन्वते।
जगच्चितं नमस्तस्मै कलानाथाय शूलिने[19]।।
एष चानन्तशक्तित्वादेवमाभासयत्यमून्।
भावानिच्छावशादेषां क्रिया निर्मातृतास्य सा [20]।।

चितिः स्वतन्त्रा विश्वसिद्धिहेतुः[21] स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति[22] इत्यादिप्रमाणानि समुपलभ्यन्ते।

प्रपंचस्याभिन्ननिमित्तोपादानकारणं ब्रह्मेत्युपपादयन्ति वेदान्तिनः। यथा प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्[23] इति प्रकृत्यधिकरणे प्रकृतिश्च इति सूत्राभागेन ब्रह्मणः उपादानत्वं निमित्तत्वं च इत्युच्यते। स ईक्षांचक्रे[24], तदैक्षत बहुस्यां प्रयायेय[25] इत्यादिश्रुतिबलेन ईक्षापूर्वककर्तृत्वरूपनिमित्तत्वं यथोपलभ्यते तथा यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति[26] इति श्रूयते। कार्यस्य च कारणे लयः श्रूयमाणः कारणस्योपादानत्वं प्रत्याययति। यतो हि लोके न कुत्रापि कार्य निमित्त्कारणे लीयमानं दृश्यते। घटादीनां कुलालादिषु लयादर्शनात्। किन्तु उपादाने एव तयो दृश्यते। घटनाशे मृदि घटलयदर्शनात्। तस्मात् जगज्जन्मस्थितिलयकारणत्वं ब्रह्मणः निमित्तोपादानोभयात्मकम्। एवं ब्रह्मणः अभिन्ननिमित्तोपादानत्वकथने एव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः तथा वाचारम्भणश्रुत्या दत्तस्य दृष्टान्तस्य च अनुपरोधः इत्यतः ब्रह्मणः

जगज्जन्मस्थितिलयकारणत्वं निमित्तोपादानोभयरूपम्।

इदं सर्वं यदयमात्मा[27], ब्रह्मैवेदं विश्वम्,[28] सर्वं खल्विदं ब्रह्म[29], इत्याद्या नामरूपात्मकस्य प्रपंचस्य ब्रह्मानन्यत्वमुक्त्वा मोक्षावस्थायां प्रपंचस्य निरासः भवति, तस्मात् प्रपंचस्य मिथ्यात्वं प्रतिपादयन्ति वेदान्तिनः। तर्हि प्रपंचस्य मिथ्यात्वे ब्रह्मणोऽपि मिथ्यात्वं स्यादिति चेत्, न अत्र कनककुण्डलवद् जगद् ब्रह्मणः परमार्थतो नास्ति विकारविकारिभावः। मायायोगेन प्रपंच करोति स्वप्नेन्द्रजालवत्। इन्द्रो मायामिमः पुरुरूप ईयते[30], लोकवत्तु लीलाकैवल्यम्[31], इत्यादिप्रमाणानि प्रदर्शयन्ति। एतेषां मते ब्रह्मणः विवर्तः प्रपंचः। प्रत्यभिज्ञास्तु ईश्वराभिन्नोऽपि प्रवंखः भिन्नेवावभासते। परमेश्वरः स्वातन्त्र्येण स्वभावृणोति प्रकाशयति च । सर्वेषु पदार्थेषु शिवः समानरूपेण भवति। अयमाभासः शिवस्य वैभवः। शिवस्यैव शक्तेः रूपान्तरत्वादयं प्रपंचः सत्यः, भेदोऽपि सत्यः। मोक्षावस्थायां शिवस्य चेतनारूपेण प्रतीयते इति प्रतिपादयन्ति ।

यथा–

एवं सर्वपदार्थानां समैव शिवता स्थिता ।
परापरादिभेदोऽत्र श्रद्धधानैरुदाहृतः।।
एवं भेदात्मकं नित्यं शिवतत्त्वमनन्तकम्।
तथा तस्य व्यवस्थानान्नानारूपेऽपि सत्यता [32]।। इति

शिवस्यैव शक्तिः माया, सा महेश्वराभिन्ना। यया सहाय्येन शिवः नानारूपी भवतीति प्रतिपादयन्ति प्रत्यभिज्ञाः। अद्वैतिनस्तु अनाद्यनिर्वचनीया भूतप्रकृतिश्चिन्मात्रसम्बन्धनी माया[33] इत्युक्त्वा–

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः[34]।।

इत्यनिर्वचनीयलक्षणं कथयन्ति। किंच, माया विद्यया नश्यति। मयायाः आवरणशक्तिः विक्षेपशक्तिश्चेति शक्तिद्वयमस्ति। आवरणशक्त्या अपरिच्छिन्नमात्मानमावृणोति अज्ञानम्। विक्षेपशकत्या रज्जौ सर्पादिकमुद्भावयति। उक्तम्–

शक्तिद्वयं हि मायाया विक्षेपावृत्तिरूपकम्।
विक्षेपशक्तिर्लिंगादिब्रह्माण्डान्तं जगत्सृजेत्।।[35] इति

जीवदशायामप्यात्मा निष्क्रियः बुद्धिसम्बन्धेन क्रियावान् भवतीति

वेदान्तिनः, जीवदशायामपि शिवस्य पंचकृत्यानि भवन्तीति प्रतयभिज्ञाः प्रतिपादयन्ति। चैतन्यमात्मा[36] इत्यत्र नास्त्युभयोर्विरोधः। वेदान्तिनः प्रतिबिम्बवादमवच्छेदवादं च स्वीकुर्वन्ति, प्रत्यभिज्ञाः केवलमाभासवादमथवा प्रतिबिम्बवादमंगीकुर्वन्ति। माययान्धः प्रमाता परमेश्वराभिन्नगुरुचरणा-रविन्दयुगलसमाराधनेनोत्पन्नप्रत्यभिज्ञारूपविद्यया दृक्रियाशक्तेराविर्भावेन शिवोऽहम् इति परमैश्वर्यज्ञानेन मुक्तः भवतीति प्रत्यभिज्ञाः कथयन्ति। अद्वैतिनस्तु अविद्यास्तमयो मोक्षः[37] इति कथयन्तः ज्ञानस्य मोक्षसाधनत्वं प्रतपादयन्ति। उभावापि जीवन्मुक्तिं विदेहमुक्तिं च स्वीकुर्वन्ति, मुक्तौ जीवपरमेश्वराभेदमंगीकुर्वन्ति।

इत्थं कश्चन भेदसत्वेऽपि प्रत्यभिज्ञादर्शनं वेदान्तदर्शनमित्युमयमपि अद्वैतप्रतिपादकदर्शनम्। उभयमपि परमपुरुषार्थप्रतिपादकदर्शनमित्यत्र नास्ति संशयः।

सन्दर्भसूची—

1— ईश्वरप्रत्यभिज्ञाकारिका

2— तन्त्रालोकविवेक+,1.1

3— तन्त्रालोक,10

4— तत्रैव 11

5— तत्रैव 13

6— स.द.सं.प्रत्यभ्ज्ञिादर्शनम्

7— वेदान्तपरिभाषा, प्र.प.

8— सर्वदर्शनसंग्रहः शां.द.

9— छान्दोग्योपनिषद् 6.2.1

10— श्वेताश्वतरोपनिषद् 6.19

11— तैत्तिरीयोपनिषद् 2.1.1.

12— हंसोपनिषद् 11

13— चित्सुखी, आ.स्व.

14— महार्थमंजरी पृ.52

15— मुण्डकोपनिषद् 2.2.10

16— पराप्रकाशिका
17— सर्वदर्शनसंग्रहः, प्र.द.
18— शिवदृष्टिः 1.44
19— स्तवचिन्तामणि 5
20— सर्वदर्शनसंग्रहः प्र.द.
21— प्रत्यभिज्ञाहृदयम् 1
22— तत्रैव 2
23— ब्रह्मसूत्रम् 1.4.23
24— प्रश्नोपनिषद् 6.3
25— तैतिरीयोपनिषद् 6.2.3
26— तत्रैव 3.2.1
27— बृहदारण्यकोपनिषद् 3.4.6
28— मुण्डकोपनिषद् 2.12
29— छान्दोग्योपनिषद् 3.14.1
30— बृहइरीएसकरेनलिरूरइ्ट्ट 2.5.15
31— ब्रह्मसूत्रम् 2.1.33
32— शिवदृष्टिः 1.39—49
33— सिद्धान्तलेशसंग्रहः प्र.प.
34— चित्सुखी 1.12
35— दृग्दृश्यविवेकः 13
36— शिवसूत्रम् 1.1
37— ब्रह्मसिद्धि 119

काश्मीर शैवदर्शने मोक्ष स्वरुप विचारः

डॉ. शुभश्री दाशः
अंशकालिक अध्यापिका
श्री रणवीर परिसरः, जम्मूः
शिक्षाविभागः

वस्तुतः सर्वेषामपि भारतीयदार्शनिकानां लक्ष्यमासीत् मोक्षप्राप्तिः। यस्य बन्धनं भवति तस्यैव मोक्षः प्रसज्यते । बन्धनं नाम द्वेतज्ञानं अस्य च द्वैतज्ञानस्य प्रादुर्भावः अशुद्धिवशात् भवति। अशुद्धिरियं मल इति उच्यते काश्मीर दार्शनिकैः। आणवकार्ममायीयभेदेन मलस्य त्रैविध्यं भवति। अणुशब्देन आणव इति निष्पद्यते। अणुत्वं च स्वं प्रति संकोचंभावना संकोचं नाम व्याष्टि ज्ञानम्।

आणवमलवशादेव कार्ममापीयोः मलयोः उत्पति भवति। आणवमलप्रभावात् आत्मा कर्मणि त्रिण्यते एतदेव कार्ममलइति कथ्यते। मायीयमलं तु दूतज्ञानं एवञ्च विचारितः बन्धस्वरुपम् । बन्ध निवृत्तिरेव मोक्षः इति दार्शनिकपद्धतिः । काश्मीर शैवदर्शने परमशिवावस्थायामेव मोक्षः इति निगदितम् । अस्यां स्थिते। जीवः शिवस्वरुपं भजते ।

द्वैतज्ञानञ्च अद्वैतज्ञानरूपेण परिणमते । एतदेव अद्वैतज्ञानं मोक्षोपायः । यदा आत्मा अद्वैतज्ञानमय भवति तदा साधकः जीवनमुकट इति कथ्यते । अस्यामवस्थायां यदपि कार्य क्रियते तत् सर्व स्पन्द क्रियेति शब्देन अभिव्यजते । अत्र च कर्मस्पन्दक्रियारुपेण परिणमते । मोक्षावस्थायाम् आत्मभिन्नानि यानि अपि वस्तुनि सन्ति न तेषां निषेधः क्रियते अपि तु सर्वाणि वस्तुनि आत्म स्वरूपाण्येव इति स्वीक्रियते । अत्र आत्मा स्वयं शिवस्वरुप भूत्वा शिवानन्दमनुभवन्ति ।

शैवदार्शनिकानां मते अन्यैः दार्शनिक सम्प्रदायैः प्रवर्तितः मोक्षोपायः सत्यस्य पूर्णरुपं न साक्षात् करोति । एतेषां च मुकिटः आशिकी मुकिटरिति वकटुं शकयते । यतोहि आणवकार्म मलौ अवशिष्येते । अतः पुनः बन्धनं प्रसज्यते ।

काश्मीरशैवदर्शनिकानां मते प्रत्यभिज्ञा मोक्षस्य मुख्योपायः ।

प्रत्यभिज्ञा च स्वस्वरुपावाप्तिः । अतः स्वस्वरूपानुसन्धानेन मोक्षवाप्तिः भवति। इतोऽपि अधमाधिकारिणां कृते चत्वारोपायाः सन्ति। आजवोपायः, शक्तोपायः, शाम्भोपायः अणुपायञ्च। एतेषां स्वरुपं विस्तरभयात् इह न उच्यते। वस्तुतः मोक्षावस्थायां कञ्चन नूतनवस्तु नायाति अपितु तच्छिवत्वं लभते । यत् पूर्वतः एव वर्तते । परञ्च मलावर्णप्रभावात् वास्तविकस्वरुपं विस्मर्यते। अतोपायैः मलवर्णमिदम् अपनीयते । शिवोऽहंमिति न केवलं बौद्धिकज्ञाने न सङ्घटते मपि तु आध्यात्मिकयाः अनुभूतेः ज्ञानमपि आवश्यकमिति ।

काश्मीर शैवदर्शने अधीकारि भेदेन उपायभेद अपि परिलक्ष्यते। आणवोपायः, क्रियोपायो वा आत्मानुभूत्यर्थं क्रियते । अत्र मूर्ति पूजा, जपः तीर्थभ्रमणं योगादिनां च समाहारः भवति । अयमेव कर्ममार्ग इत्यपि कथ्यते क्रियायाः प्राधान्यत्वात्।

शाकटोपायेन साधकः अद्वैतज्ञानं प्रत्येति । आत्मा एव इदं सर्वमित्यस्य अभ्यासः क्रीयते अत्र । अतः ज्ञान प्राधानत्वात् ज्ञानमार्गमपि कथ्यते।

शाम्भवोपायस्तु साधनायाः आध्यात्मिकी भूमिः यत्र अहंभावस्य समर्वज्ञं भाव्यते । अत्र पूर्णतत्त्वेन एकाकारत्वं प्रत्यभिज्ञा इति उच्यते । प्रत्यभिज्ञा च साध्यसाधन उभयरुपा प्रत्यभिज्ञा पूर्ववति संस्काराणां प्रत्यक्षजन्य संस्कारैः ताक्षत्म्य निरुपणम्। प्रत्यभिज्ञायां पूर्ववति ज्ञानं तात्कालिकप्रत्यक्षज्ञानञ्च अपेक्ष्यते यतोहि प्रत्यभिज्ञायाः आधारस्तु पूर्वज्ञानमेव ।

परिशीलित सन्दर्भग्रन्था :–

1) शिवसूत्रवृत्ति ।

2) महानिर्वाणतन्त्र ।

3) रुद्रयामल ।

4) महाकालसंहिता ।

5) कुलाणतन्त्र ।

6) प्रत्यभिज्ञाहृदयम् ।

अत्र स्मृतेः सम्बधः भूतकालेन सह वर्तते । मतिः भविष्यत्कालेन सम्बद्धा विद्यते । बुद्धेः सम्बन्धः वर्तमानकालेन सह भवति।

अत्र प्रज्ञायाः सम्बन्धः भूतभविष्यद्वर्तमानमिति कालत्रयेऽपि वरीवर्ति। सा प्रज्ञा एव भूतकाले स्मृतिरिति, भविष्यकाले मतिरिति, वर्तमाने बुद्धिरिति व्यवह्रियते । यदि व्यक्तौ प्रज्ञा भवति तर्हि सा प्रज्ञा प्रतिभात्वेन प्रकट्यते। स एव नरः प्रतिभाशालीति स्तूयते । एतदेवाह अभिनवगुप्ताचार्यः–

प्रतिभा अपुनर्वस्तुनिर्माणक्षमा प्रज्ञा इति ।

(आलोचनम्, पृ.सं.93)

एवमेव लोकेऽपि समान्यतया प्रतिभाशालिनः एव गणितज्ञाः, वैज्ञानिकाः, वावदूकाः प्रविधिशास्त्रनिपुणाः च भवन्ति ।

प्रतिभाशालिनः एव प्रतिक्षणम् उन्नतिमाप्नुवन्ति । अतः वक्तुं शक्यते ज्ञानग्रहण सामर्थ्यं बुद्धिरिति । प्रसिद्धः मनोविज्ञानी बंकिंधम महाशयस्य बुद्धिलक्षणमपि भट्टतौतोक्तमर्थं प्रकाशयति। तदाह बुद्धिलक्षणं बंकिंधम महाशयः अधिगमक्षमता बुद्धिः इति।

एवं च तारण्डैकमहोदयः बुद्धिरिति एकवचनापेक्षया बुद्धयः इति बहुवचननिर्देशः वरमिति मनुते अमूर्तबुद्धिः, यान्त्रिकबुद्धि, सामाजिकबुद्धि इतिं अत्र अमृतबुद्धेः सम्बन्धः भूतकालेन, तान्त्रिक बुद्धिसम्बन्धः वर्तमानेन, सामाजिकबुद्धिसम्बन्धः भविष्यकालेन सह वर्तते इति विवेकः । पुनश्च मानवस्य बुद्धौ त्रयोदशांशाः परस्परं असंप्रकताः वर्तते इति तरस्टन् मन्यते। माजु सप्त मूलभूताः विद्यन्ते। यथा –

1) आंकिककुशलता।
2) स्मृतिकुशलता ।
3) शब्दकुशलता ।
4) दैशिककुशलता ।
5) वरितशद्धकुशलता ।
6) प्रत्यक्षज्ञानकुशलता ।
7) तर्कणकुशलता ।

यदि इमे अंशाः बुद्धौ वर्तन्ते तर्हि स एव प्रतिभाशाली इतिं वक्तुं शक्यते । अत एव मनोविज्ञानप्रवीणैः बुद्धयुपलब्धौ स्तप्भेदः प्रकाशितः

भट्टतौतप्रतिपादितबुद्धिनिरूपणे मनोवैज्ञानिकता

डॉ. नारायण वैद्यः
अतिथिअध्यापकः
श्री रणवीर परिसरः, जम्मूः
शिक्षाविभागः

इह खलु बुद्धिशक्तिः मनसा सम्बद्धा वर्तते। यथा मानवः सामाजिकः अस्ति तथैव बुद्धिजीविरपि वर्तते। प्राणिनामपेक्षया उत्तमरूपेण व्यवहरतीत्यतः मानवः प्राणिनामपेक्षया प्रोबतपदमलङ्करोति। पावं बुद्धिशक्तिसाहाय्येनैव मानवः विवेचनशक्ति वहति। नूतनसन्निवेशेन सह सम्यक् समञ्जनं स्थापयति। बुद्धिः मनसः विलक्षणशक्तिः विद्यते। बुद्धिशक्ति साहाय्येनैव मानवः स्वीयसमस्यां निवारयित्वा स्वीयं जीवनं साधयति। सामान्यतया व्यवहारे उत्तमः साधकः यः भवति सः बुद्धिमानिति व्यपदिश्यते। समेषां जीविनां बुद्धिः वर्तते किन्तु तत्र किञ्चित् प्रत्येकं व्यक्तेः बुद्धिभेदः दृश्यते। अतः लोके मन्दमतिः अलपमतिः बुद्धिमान्, प्रतिभाशाली इति व्यवहारः अवलोक्यते । अधिगमप्रक्रियायां बुद्धिशक्तिः प्रमुखं पात्रं वहति।

बुद्धिलक्षणानि –

- क्लिष्टतमपरिवेशस्य सवानुकूलीकरणसामञ्जस्य सम्पादनात्मिका शक्तिरेव बुद्धिरिति – स्पेन्सर् ।
- अमृतचिन्तनं बुद्धिरिति – टर्मन् ।
- सर्वव्यवहारहेतुः बुद्धिः ज्ञानमिति – अन्नभट्टः ।
- जीवात्मनः प्रकाशकः बुद्धिः – अभिनवगुप्तः (ईश्वरप्रत्यभिज्ञाविमशिती)

भट्टतौतमतानुसारं बुद्धिनिरूपणम् –

प्रत्यभिज्ञादर्शने सहित्ये च बुद्धिविषयकनिरूपणं दृश्यते तदुक्तं भट्टतौतेन –

स्मृतिः व्यतीतविषया मतिरागामिगोचरा ।
बुद्धिः तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता ।
प्रज्ञानवनवोन्मेसशालिनी प्रतिभा मता ।।

भट्टतौतः– काव्यकौतुकम्

अस्ति। यथा –

0 – 25 – जटुः
25 – 50 मृढः
50 – 70 क्षीणबुद्धिः
70 – 80 दुर्बलबुद्धिः
80 – 90 मन्दबुद्धिः
90 – 110 सामान्यबुद्धिः
110–120 उत्कृष्टबुद्धिः
120 – 140 अत्युत्कृष्टबुद्धिः
140 तः उपरि प्रतिभाशाली

एतदनुसारं टरमन् महाशयः परीक्षामकरोत् एतस्य फलितांशाधारेण तत्त्वदार्शेनः, प्राथम्यं, कवयश्य द्वितीयं स्थानमलंकृतवव्त्रः । तत्त तत्वदार्शिनां 170, कवीनां 160 बुद्धिसंस्था अनेन महोदयेन प्रप्तः अस्ति।

उपसंहार –

शास्त्राण्यधीत्यापि भवन्ति मूर्खाः
यस्तु क्रियावान् पुरुषः स विद्वान् इति

उपदिशति हितोपदेशः । वद्यं शास्त्राण्यधीत्य सर्जनात्मकशक्तिं च सम्पाद्य बुद्धिं सत्कर्मणि नियोज्य लौकिकजन्मनि यशः प्राप्य बुद्धेः सार्थक्यं समर्थयामः इत्यश्यदाय वाक्कुसुमं समर्पयति।

सन्दर्भग्रन्थसूची –

1. ध्वन्यालोकः – आनन्दवर्धनाचार्य – चौखम्बा विद्या भवन वाराणसी।
2. शिक्षामनोविज्ञानम् – वि. एस. वेङ्कटराघवाचार्यः R.S.V.P. तिरूपतिः।
3) शिक्षामनोविज्ञानम् – पि. तागमुनि रेड्डि R.S.V.P. तिरूपतिः।

व्याकरणशैवदर्शनयोः शब्दतत्त्वम्

राहुलशर्मा
एस.आर.एफ.शोध–अध्येता
राष्ट्रिय संस्कृत संस्थान,
भोपाल परिसर

व्याकरणदर्शने शैवदर्शने च शब्दतत्त्वविचारः समुपलभ्यते। उभयत्रापि शब्दसृष्टिवादः स्वीक्रियते। आदौ व्याकरणदर्शने शब्दतत्त्वं परिशील्यते–

महाभाष्ये पतञ्जलिना शब्दस्वपरिवारे अथ गौरित्यत्र कः शब्दः? इति जिज्ञासायां "येनोच्चारितेन सास्नालांगूलककुदखुरविषाणीनां सम्प्रत्ययो भवति" स शब्दः इति। अथवा प्रतीतपदार्थको लोके ध्वनि शब्दः इत्युच्यते। इति प्रोक्तं । तत्र व्याकरणमतानुसारेण प्रथमं स्फोटस्य नित्यस्य शब्दत्व प्रतिपाद्य पश्चाद अथवा प्रतीतपदार्थकः इति वचनेन ध्वनेः शब्दतत्वं प्रत्यपादि। अत्र स्फोट व्यंगयः ध्वनिश्च व्यंजकः । ध्वनिः द्विविधः प्राकृतो वैकृतश्च । तथा चोक्तं हरिणा–

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमितत्तत्वं वैकृतः प्रतिपद्यते।।

तथा च यथा एकमाकाशं घटपटादि+ परिच्छेदकवशाद् नानां प्रतीयते। तथैव अविद्याजनिततद्ध्वनिपरिच्छेदकवशाद् एकोऽपि स्फोटः नाना प्रतियते। भर्तृहरिप्रणीतवाक्यपदीयेऽपि शब्दतत्वं परिशीलितं वर्तते। अस्मिन् च ग्रन्थरत्ने शब्दस्वरूपं प्रकाशयता भर्तृहरिणा अनेकानि पद्यानि समुल्लिखितानि । सर्व प्रथमम् आह–

अनादिनिर्धनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

इति कारिकया हरिणा शब्दस्वरूपमुपवर्ण्य तस्य जगत्कारणत्वं प्रत्यपादि । अनादिनिधनं मिति अक्षमिति च शब्दब्रह्मणः तटस्यलक्षणम्। अर्गित् प्रागभावाप्रतियोगित्वे सति प्रध्वंसा प्रतियोगित्वे सति व्यापकत्वम् शब्दब्रह्मणो लक्षणम्। अथवा जगत्कारण्यत्वम् शब्दब्रह्मणो लक्षणं शब्दब्रह्मणो जगत्कारणत्वे श्रुतिरषि मानम्–ब्रह्मेदं शब्दनिर्माण शब्दशक्ति निबन्धनम्

इति। व्याकरणदर्शने शब्द एव ब्रह्म। जगतः विर्वतरूपा उत्पत्तिः भवति। शब्दब्रह्मणः इति समायति। वैयाकरणनये पराख्यस्य शब्दब्रह्मणः वास्तविकस्वरूपविज्ञानेन शब्दब्रह्मणा साकं तादात्म्यानुभूतिरेव मोक्षः। वैयाकरणनये शब्दब्रह्मणः अविद्या जगदिदं विवर्तते। व्याकरणमाध्यनेन शब्दविषयक विद्या निवृत्तौ तस्मिन् शब्दब्रह्मणि जगल्लये तत्स्वरूप विज्ञाने तादात्म्यानुभूतिः मोक्षः। एवं च व्याकरण दर्शने वास्तविक शब्दब्रह्मण विज्ञानेनैव मोक्षः इति कृत्वा शब्दस्य ब्रह्मणत्वं प्रतिपादितम्।

शैवदर्शनेऽपि शब्दतत्वस्य सृष्ट्युत्पत्तौ महति भूमिका वर्तते। शैवदार्शनिकाः अपि शब्दसृष्टिवादं स्वीकुर्वन्ति। व्यक्ताव्यक्ताक्षराणाम् उत्पत्या साकमेव प्रकाशस्य (शिवस्य) अपि उत्पत्तिः भवति।

एकाग्रतायाः साधनया इमामुत्पत्तिं द्रष्टुं शक्यते। शैवदर्शनमतानुसारं प्रकाशः विमर्शश्च सृष्ट्याः मूलतत्वं वर्तते। प्रकाश विमर्शयोः एव रूपान्तरं शब्दः अस्ति। ओमित्येकाक्षरं ब्रह्म इति श्रुत्वा ऊंकारः प्रणवः एव शब्दब्रह्म एवं च शाब्दी–आर्थीसृष्टयोः मूलमपि प्रणवः। यत्र शब्दः शक्तिः नादश्च तिष्ठति तत्र प्रकाशोऽपि भविष्यति एव । षब्दप्रकाशयोः अविनाभाव सम्बन्धः विद्यते। प्रकाशश्च प्रत्येकं अक्षरे अनुस्यूतः। मातृकाभिः अक्षरैश्च सह प्रकाशः अनिवार्यः। नादस्योत्पत्तौ च गतिः अनिवार्या। गत्युत्पत्तौ च उष्णत्वनिर्माणम्। एवं च ऊष्णत्वं नादः गतिश्च परस्परमवलामवितम्। यत्र ऊष्णता तिष्ठति, तत्रैव गतिः भवति। यत्र च गतिः तत्रैव नादः वर्तते। कृण्डलिनी शक्तिः यदा अव्यक्तात् व्यक्तं भवति, तदा वेगः उत्पद्यते । वेगात् यः आदिस्फोटः भवति, स स्फोटः एव नादः कथ्यते। नादतः प्रकाशः जायते। प्रकाशस्य व्यक्त रूपं महाबिन्दुः वर्तते। जीवसृष्टो उत्पन्नस्य नादस्य अभिधानमेव प्रणवः (ऊँकारः) शब्दब्रह्म। ओंकारात् च द्विपचाशत् मातृकाणाम् आर्विभावः। तासु मातृकासु पंचाशत् मातृकाः अक्षरात्मिका। अन्ये च द्वे प्रकाश प्रवाह रूपे वर्तते। शिवः अव्यक्तः शक्तिः च व्यक्तः अस्ति। अव्यक्त व्यक्तम् आश्रीकृत एव स्वस्वरूपप्रकाशाय समर्थः भवति। परमशिवः शक्तया साकमेव सृष्टिरूपे व्यक्तः भवति। एवं च ओंकारात् आदौ स्वाराणामुत्पत्तिः अन्तरं च व्यंजनानाम्। तथा च स्वरव्यंजनानां बीजम् ओंकार प्रणवः एव इदानीं शाब्दी सृष्टिः क्रमेण निरूप्यते–

1— मूलाधारे परावाणी (परावाक्) तिष्ठति।

2— सर्वादौ मनसि वृत्तिः उत्पद्यते । तदनन्तरं वृत्तेः सदृशः विचारः समुत्पद्ययन्तें विचाराभिव्यक्तेः मूलस्थानं परावागेव ।

Maya, the essential power of Cidrupa Brahma, Kundalini, the hidden energy in the body or Creative power of Shiva Kriya power of general dynamism of cousciousness called Spanda or Spontaniety; Madhumati; essence of all juices of Joy, Kali, the power that yields time Kala, the Subtlest aspect of objectivity or creativity. Malini, the power of letters which holds the entire Universe within itself, Matangi, the graceful who grants a desired boon to her devotees, Vijaya, the purity of consciousness that grants victory over the attitude of sense organs Jaya, who grants release from action, inaction and the fruit thereof, Bhagavti, who is full with six enternal glories, Devi, the self-illuminous Divinity, manifesting from Siva, Sambhavi who is per meated with Supreme on Siva-Consciousness, who is in the state of Siva, Sakti, power of Siva to manifest Sankaravallabha, the beloved of Sankara, Kamesvara, indistinguishably one with Kamesvani, Trinayana, the three eyed mother; Vakvadini who persuades speed (vak) internally, Bhairvi, the power of eternal prosperity of Bhairva Shiva, Hrimkari, in whom love of Shiva Shines Supreme.

Tripura, the Primal energy (para Shakti) transcending the three devine deities representing three Gunas : Paraparamayi who is both self revelation (Prakasa) and self-consciousness (Vimarsa) herself; Mata who is Kula Sundri the source of all energies, whatsoever Kumari, the ever new devine effulgence that destroys the sense of duality.

Ref :-

1. Pancastavi, Inj Kaul Janki Nath Kamal published by Rama Krishan Mission S- 1996.
2. Pancastavi भाषा टीका सहित Prem Nath Shastri, Vijeshwar Karyla, Gole Gujral, Jammu.

Laleshwri was a fourteen centuary mystic Shivite poet. She was born when in 1338 Islamic on slaught had captured Kashmiri. She has the distinctions in spreading Kashmiri Shaw Darshan in local ditect in the shape of Vaks she is called the Sangam Trik & Vedic thought.

दीव वटा दीवुर वट।
प्यठ ब्वन छुय यीक वाठ
पूज कस कररव हूट् बट ।
कर मनस त् पवनस संगठ

अर्थात् ललेश्वरी कहती है कि मन्दिर तथा इसमें स्थित मूर्ति एवं इसके बैठने का आसन, ऊपर से नीचे तक सायं कुछ पत्थर है। अब तुम किस पत्थर की पूजा करोगे । हां केवल अपने मन और प्राणों को एक करके तू स्वात्म को प्राप्त होगा ।

215 वारव –

आम्य आद्य तय ओमय सोरूम
ओमय ठहरूम पुनन पान
अन्यथ वा विथ न्यथय बोसुम
तवय प्रोवुम परम सथान

अर्थात् ओम ही आद्य है इसलिए ओम का ही स्मरण किया ओम को अपना आप ही मान लिया । अनित्य को छोड़कर नित्य अर्थात् ईश्वर का ही आभास होगा इसी कारण ओम की उपासना से मैंने परम स्थान पा लिया ।

After the Maha Bharat war, Lord Krishna himself visited Kashmir and gave the throne to Yashovti who was in family was widow of Danudhar who had died in the water Lord says

कश्मीर पार्वती तत्र राजाज्ञेयोहराशजः
नावज्ञेयः स दुष्टोऽपि विदुषा भूति मिच्छता ।
कलहण, राजतरगिणी, प्रयमतरंग श्लोक – 72

कैश्मीर भूमि साक्षात पार्वती है। इस भूमि के राजा को शिव का

अंश समझना चाहिए । यदि यहां का राजा दुष्ट भी हो तो भी ऐश्वर्य चाहने वाले बुदिमान को कभी भी उसका विरोध नहीं करना चाहिए ।

In the 17th Centuary came the Divine Alkashwani Shri Rupa Bhawani. She had the religious treatise of Laleshwari and New Rishi. The Kashmiri Shaiv Darshan had got hidden due to Islamic on slaught and if has waiting for revival by some divine grace sit was done by Maa Alkashwari. In 1629 she took birth in Bakhat Shri Madhav 100 Dhars house

पिवान पाने ते जेंवान पाने ।
रिवान पाने ते निवान टख ।
नाना प्रकार गिन्दान पाने ।
रिन्दान पाने ते हेंवान पत्थ ।

भावार्थ :–

इस विराट – विश्व में स्वयं पर ब्रह्म ही विविध स्वरूप धारण करके (स्वयं ही आकर) जन्म धारण करता है। स्वयं ही अपने अस्तित्व से खीझ कर रोता है और यहाँ से चला जाता है। यहा जो इस ब्रंह्माण्ड की अनन्त क्रीड़ा हो रही है वह सब स्वयं परब्रह्म ही करता है। स्वयं ही अपार हर्ष से प्रफुल्लित होकर इस सब को अपने में लीन करता है।

सन्दर्भग्रन्थ :–

1) श्री रूपभावनी रहस्योपदेश भाषा–टीका सहित ।
2) Dr. Ramesh Kumar Sharma and Prof T.N. Gagar Alkashrian ट्रस्ट।
2) पराग, Lalehsri Wakh

काश्मीरवास्तव्यस्य भट्टलोल्लस्य रसनिष्पत्तिविषयकविमर्शः

प्रो. विद्यानन्दझा
आचार्योविभागाध्यक्षश्च,
साहित्यविभागे
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः

अलङ्कारशास्त्रस्य विकासभूमिः शारदाप्रदेशकश्मीराणां पवित्रभूमिः इति साहित्यशास्त्रविशारदाः इतिहासविदश्चापि पौनःपुन्येन वदन्ति। यतो हि आचार्यभामह–उद्भट–रुद्रट–मुकुलभट्ट–आनन्दवर्धन–अभिनवगुप्त–रुय्यकमम्मट–भट्टनायक–कुन्तक–महिमभट्टादिसदृशानां महिममण्डितानां पण्डितधुरीणानां अलङ्कारशास्त्रमर्मज्ञानां पवित्रजन्मभूमिः कश्मीरप्रदेशः एवास्ति अतः अस्य शास्त्रस्यापि उद्गमस्थली कश्मीरस्य उर्जस्वलापवित्रभूमिस्तथा शास्त्रस्यास्योद्भावकाः शारदाप्रदेशस्यैव निवासिनः अभूवन्।

अतोऽयं प्रदेशः न केवलं महाकवीनां प्रत्युत महनीयालोचकानामलङ्कारमर्मज्ञानामपि जन्मदातृत्वात् गौरवमण्डितो विलसति। अत्रैवालङ्कारिकमूर्धन्येष्वन्यतमो भट्टलोल्लटकृतो रसनिष्पत्तिविषयो विमृश्यते–

"रसो वैसः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवती" ति

तत्त्वदृष्ट्या विचारेण भग्नावरणस्य रत्यादिविषयकस्यात्मचैतन्य स्यैव वस्तुतो रसरूपतया "रसो वैसः" इति श्रुत्या काव्यरसस्य सामञ्जस्यं जायते। स एवायमात्मा तैत्तिरीयोपनिषदो ब्रह्मवल्ल्यां रसरूपेण भूयो भूयः प्रतिपादितः। तमेव रसरूपं परमात्मानं लब्ध्वा आनन्दीभवत्ययं जीवात्मा। अभिनवमम्मटादिप्रतिपादितदिशा आवरणरहितचिद्विषयीभूतरत्यादिस्थायी भाव एव रसः। यथालोके सुखात्मकज्ञानस्य सुखं विषयस्तथैवात्र मते रसात्मकज्ञानस्य रसो विषयः। परन्त्वस्मिन् आत्मचैतन्यविषयीभूते रसे चैतन्यरूपत्वाभावेन रसचैतन्ययोरेकत्वप्रतिपादिका रसो वै रसः ब्रह्मै रसइत्यादिका श्रुतिर्विरुद्ध्यते अतो रसो वै सः, इत्यादि श्रुतिस्वारस्येन रत्याद्यवच्छिन्नभग्नावरणा चिदेव रसः। अत्रैव स्वयं रसरूपो भगवान् रसरूपेणानुभूयते। अत एव भक्तशिरोमणिना मधुसूदनेनोक्तम्–

भगवान् परमानन्दस्वरूपः स्वयमेव हि।
मनोगतस्तदाकाररसतामेति पुष्कलम्।। (भक्तिरसायने–1/10)

रसनिष्पत्तौ विविधवादानां दार्शनिकाधारः—

रससिद्धान्तप्रतिपादकेषु ग्रन्थेषु प्राचीनतमतया भरतप्रणीतत्वेन प्रतीतं नाट्यशास्त्रमुपलभ्यते। भरतेन नाट्यशास्त्रे उच्यते— "नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते।" (नाट्य–6/39)

कथं रसनिष्पत्तिरिति जिज्ञासायां तेनोच्यते—

विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः।

नेदं वस्तुतो रसलक्षणम्। मन्यतां नामाभिनवगुप्तोऽस्य रसलक्षक्षणत्वम् एवं क्रमहेतुमभिधाय रसविषयं लक्षणसूत्रमाहेति। अयं भावः— उद्देशलक्षणपरीक्षा इति शास्त्रपर्वाणि। तत्रोद्देशपर्वणि प्रतिपाद्यानां पदार्थानां क्रमेण निर्देशः। लक्षणपर्वणि च क्रमहेतुकथनपुरस्सरं तेषां लक्षणम् परीक्षापर्वणि चाव्याप्त्यतिव्याप्त्यसम्भवादीनां लक्षणदोषाणां प्राप्तिप्रतिषेधाभ्यां लक्षणस्य परीक्षणं क्रियते। तथात्र भरतनाट्यसूत्रेष्वपि उद्देश्यक्रमप्राप्तस्य रसस्य क्रमे हेतुमुपन्यस्य तस्य लक्षणमनेन सूत्रेणोक्तमित्यभिनवभारत्या विवृतम। वस्तुतस्त्विह सूत्रे रसनिष्पत्तिराख्यायते न तत्स्वरूपम्। परं तत्स्वरूपनिरूपणमप्यत्रैवान्तर्हितम्। एतत्सूत्रमेवाधृत्य ग्रन्थे रसस्वरूपं पल्लवितम्। स्वयं भरतेन स्वमतमेव प्रकाशितम्—

यथा हि नानाव्यजनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति, यथाहि गुडादिभिर्द्रव्यैर्व्यजनैरोषधिभिश्च आसवादयो रसा निर्वर्तन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।

अत्राह रस इति कः पदार्थः? उच्यते, आस्वात्वात्। कथमास्वाद्यते रसः? यथा हि नानाव्यजनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादीनाश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रक्षका हर्षादींश्चाधिगच्छन्ति तस्मान्नाट्यरसा इत्यभिव्यांख्याता इति नाट्यशास्त्रे। अस्य विवेचनस्यायमभिप्रायः—

रसो हि नाम नास्वादः, अपि त्वेष आस्वाद्यः।
नायमनुभवः, अनुभवविषयः खल्वयमिति भावः।।

न रसो विषयिगतः, अपितु विषयगतोऽसाविति शब्दान्तरम्। विविधैर्भावैर्विभानुभावव्यभिचारिभावैः समन्वितस्त्रिविधैरभिनयैश्चाभिव्यञ्जितः स्थायी भाव एव रसरूपे नाट्यरसरूपे वा परिणमति। यथा व्यञ्जनादिभिः संस्कृतमन्नमेव आसवादिभोज्यरसरूपं धारयति, तथैव नाट्यसागग्रीभूतै—

र्विविधैर्भावैस्त्रिविधैरभिनयैश्च प्रस्तुतः स्थायीभाव एव नाट्यरसतामुपैति। अत्र स्थायीभावाऽन्नेन नाट्यसामग्री च व्यञ्जनौषध्यादिभिरूपमीयते।। अभिनवगुप्तेनास्यसादृश्यस्यावयवेष्वपि सङ्गतिं स्थापयितुं पयतितम्, परं न तदतिसमीचीनं नापि चापेक्षितम्, तेन हि मूलतथ्यमस्तव्यस्तीभवति, न च स्पष्टीभवति।

स्थायीभावो न रसः, अपि त्वेष रसाश्रयः। नाट्यसामग्रीसमन्वितो ह्येष रसतामेति। यथाऽन्नं न रसः, अपतु रसाधारः, व्यञ्जनादिसंस्कृतं हि तद् रसो भवति। तथा रतिः स्थायी भावः स्वरूपेण नास्ति श्रृङ्गारो रसः, अपितु नायकनायिकास्मितकटाक्षहर्षवितर्कादिभिर्विभावानुभावव्यभि–चारिभिः प्रसक्तैरन्वितस्त्रिविधोनाभिनयेन च रङ्गे प्रस्तुतः श्रृङ्गाररसव्यपदेश्यतामेति।

सहृदयो रसमास्वादयति परमेष आस्वादो हर्षादिरूप एव न रसरूपः। हर्षादेश्च द्वावर्थौ– रसास्वादो न केवलानन्दमयः, अपितु तत्तत्स्थायिभावानुसारितया नानारूप इत्येकः। भरतेन हर्षादिशव्देआदिपदेन हर्षविरोधिन्यः प्रतिकूला अनुभूतयो न गृहीताः, प्रत्युत कुतूहलप्रभृतयः आनन्दमय्योऽनुभूतय एव संकेतिता इत्यपरः।

संयोगशब्दं निष्पत्तिशब्दं चाश्रित्य विविधा वादाः प्रादुरभवन्। प्रध ान्येन चत्वारो वादा विविधदर्शनविद्भिः प्रतिपादिताः। तत्र 1. भट्टलोल्लटेन मीमांसादर्शनम् आश्रित्य उत्पत्तिवादः। 2. शङ्कुकेन न्यायदर्शनमाश्रित्य अनुमितिवादः। 3. भट्टनायकेन सांख्यदर्शनमाश्रित्य भुक्तिवादः। अभिनवगुप्तेन च वेदान्तदर्शनमाश्रित्य अभिव्यक्तवादः पस्तावितः।

काव्यदर्शनानुसारेण शब्दार्थसौन्दर्यमाध्यमेन विभावानुभावव्यभि–चारिभावसमन्वितः स्थायीभावो रसरूपतां प्राप्नोतीति–प्राक्प्रीतिर्दर्शिता सेयं रतिः श्रृङ्गारतां गता।

रूपबाहुल्ययोगेन तदिदं रसवद्वचः।।

अर्थात् विभावादिभिरपोषिता रतिः केवला प्रीतिरेव भवति। परं तैः परिपोषिता श्रृङ्गाररसतया परिणमति। अत्रापि रसो विषयगत एव, आस्वाद्यरूप एव वा पतिपादितो नास्वादरूपः।

भरतसूत्रव्याख्यातृणामाचार्याणां विवेचनेनरसस्वरूपं क्रमांद् विषयिगतमभूत्। आस्वाद्यतां विहाय च रस आस्वादतां गतः। अस्या अर्थपरिवृत्तेरुत्तरदायितमस्तत्र भवान् अभिनवगुप्तोऽभवत्। स किल शैवाद्वैतवादस्य प्रख्यातोऽभूदाचार्यः। अतोऽसौ स्वकीयया दार्शनिक्या

मेधया रसविवेचनमपि शैवाद्वैतसिद्धान्तरागेण रञ्जितवान्। सोऽभन्यत रसपदार्थो वा आनन्दः। आनन्दश्चायमात्मगतो न तु विषयगतः। विषयस्तु केवलमात्मपरामर्शस्यात्मास्वादस्य वा माध्यममात्रम् येन प्रमाता संविद्विश्रान्तिम विन्दति। सेंय संविद्विश्रान्तिरेवानन्दः। अतो रसस्य नाट्यगतत्वं न सम्भवति, नाट्यं तावत् संविद्विश्रान्तिरूपस्यास्य रसस्य माध्यममात्रम्। पण्डितराजदृशा त्रिविधानन्दः शक्यते तावदेवं व्याख्यातुम्–

1. विषयानन्दः– (लौकिकसुखम्) आनन्दाभासः–
चैतन्भासेनाभासितानामन्त– करणवृत्तीनां विषयसामञ्जस्येव जायमानोऽन्तः करणवृत्तिविशेषरूपः।
2. ब्रह्मानन्दः– (विशुद्ध आत्मानन्दः) निरुपाधिकचैतन्यस्वरूपानन्दः।
3. काव्यानन्दः– (रसः) सोपाधिक आत्मानन्दः विशुद्धरत्याद्युपाधिनोपहितश्चैतन्याकाराकारितश्चित्तवृत्तिविशेषानन्दः। मम्मटेन रस एव सकलप्रयोजनमौलिभूतस्तदास्वादश्चानन्दमय इति प्रतिपादितम्– "सकलप्रयोजनमौलिभूतसमनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम् इति काव्यं करोति इति शेषः।

यदि भरतस्य "स्थाय्येव रसः" इत्युक्तमनुसृत्य स्थायिरसयोरभेदः प्रतिपाद्यते तथा नेदमनवद्यम्। अभिनवो हि "नियमेन स्थायिविलक्षणो रसः" इत्यत्रैवास्थितः। तेन मन्महे यदभिनवः स्थायिनामेव सुखदुःखस्वरूपतां मन्यते न रसानामिति स्वपश्टम्। तथाहि–

"विलक्षणाकारसुखदुःखादिविचित्रवालसनानु–
वेद्योपनतदृद्यतातिशयसंवच्च–वर्णात्मना भुज्यते"

साङ्ख्याचार्याणां मतमववदताभिनवेनोक्तम्–
येन त्वभ्यधायि सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव, सांख्यदृशा सुखदुःखास्वभावो रसः। तस्याञ्च सामग्रीजन्या आन्तराः सुखदुःखस्वभावा इति। तेन स्थायिभावान् रसमुपनेष्यामः इत्यादावुपचारमङ्गीकुर्वता ग्रन्थविरोधं स्वयमेव बुध्यमानेन दूषणाविश्करणमौर्ख्यात् प्रामाणिको जनः परिरक्षित इति किमस्योच्यते। यत्त्वन्यत् प्रतीतिवैषम्यप्रसङ्गादि तत्कियदत्रोच्यताम्।

अतो नूनमियं धारणाभिनवस्य मूलसिद्धान्तमेव प्रतिरुणद्धि–
"अस्मन्ते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का।"

भारतीयकाव्यशास्त्रे किलाचार्याणां बहुमतोऽयमेव पः अभिनवात्पूर्वं भट्टनायकेनोत्पत्तिप्रतीत्यननुमितिप्रभृतिसिद्धान्तान्निरस्यता ये तर्का

उपस्थापितास्वतेष्वयं पश्यतः सामाजिकस्य चदुःखमेव स्यात् अर्थात् करुणरसस्यास्वादो दुःखमय एवं स्यात्।

"रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। न च सा पतीतिर्युक्ता सीतादेरविभावत्वात्। स्वकान्तादिस्मृत्यसंवेदनाम्"।

इत्थं भट्टनायक्साभिमतां करुणरसस्य दुःखमयतां प्रतिषिध्यं रस–मात्रस्याऽऽनन्दमयताऽतर्क्यतया प्रतिष्ठापिताभिनवगुप्तेन।

अतो रसानुभूतिः प्रीतिकर्येवा। आनन्दमयी चेतनैव सा। तत्र विवादः शाब्दिक एव न तात्त्विकाः। वेदव्यासेनाऽपि वेदान्तानुसारेणं रसादिनिरूपणं क्रियते। यथा–

अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेष वदन्त्येकं चैतन्यं ज्योतिरीश्चरम्।।
आनन्दः सहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिः सा तस्यचैतन्यचमत्काररसाह्वयः।। (अग्निपुराणे–4–1–2)

भट्टलोल्लटस्योत्पत्तिवाद आरोपवादो वा–

रसनिष्पत्तिः भारतीयकाव्यशास्त्रस्य महत्त्वातिशयपूर्णो विषयः। वस्तुतो रसविवेचनमत्र रसनिष्पत्त्यैवोपक्राम्यते। भरतेन हि मूलतो न रसस्वरूपम्, अपितु रसनिष्पत्तिरेव व्याख्यातम्–

विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः

अत्र सूत्रे संयोगनिष्पत्तिशब्दयोरर्थो न स्पष्टः, एतावेव चाधिकृत्य परवर्तिन्याचार्ये गहनः शास्त्रार्थः प्रवृत्तः। एतस्मिन् सूत्रे कथम्बिधः संयोः च कथम्भूता निष्पत्तिरस्ति इति विषये चत्वारो वादाः प्रमुखा सन्ति। तेषु प्रथमःभट्टोलोल्लटस्य– उत्पत्तिवादो वा आरोपवादः। भट्टलोल्लटो मीमांसादर्शनमाश्रयते। तन्मतानुसारं विषये एव रसोत्पादनस्य क्षमता। अत्र रसो वाच्यः, न तु व्यङ्ग्यः। अतो मतमिदम् उत्पत्तिवादः, तात्पर्यवादः, आरोपवादो वा कथ्यते। यथा मीमांसामते यजमानः पुरोहितादिमाध्यमेन यज्ञस्य फलम् अवाप्नोति, तथैव दर्शकानां रसप्रतीतिः अभिनेतृणां माध यमेन संजायते।

लोल्लटस्यापि ग्रन्थो नोपलभ्यते। सर्वतः प्रथमं रसविषयकस्य तन्मतस्योद्धरणान्यभिनवगुप्तग्रन्थेऽभिनवभारतीनामके, केचिदुल्लेखाश्च तदीय एव ध्वन्यालोकलोचने प्राप्यते। तदितरो द्वितीय आधारो मम्मटप्रणीते काव्यप्रकाशे समुद्धृतं लोल्लटमन्तव्यमपि वर्तते यदतिसंक्षिप्तम्, अभिनव–

भारतीसमुद्धृततन्मन्तव्यतः किञ्चिद् भिनञ्च। परवर्तिभिराचार्यैः सर्वै
प्रायोमम्मटवक्तव्यमेव पुनरावर्तितम्।

एनामत्यल्पां सामग्रीमाधृत्य लोल्लटमतं व्याख्येयं विवेच्यं च
अभिनवोद्धृतं लोल्लटमतम्– अभिनवभारत्याम्–

अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः– विभावादिभिः संयोगोऽर्थ
स्थायिनस्ततो रसनिष्पत्तिः। तत्र विभावश्चित्तवृत्तेः स्थाय्यात्मिकायाः कारण
अनुभावाश्च न रसजन्या अत्र विवक्षिताः, तेषां रसकारणत्वेन गणनानर्हत्वा
अपितु भावानामेतेऽनुभावाः। व्यभिचारिणश्च चित्तवृत्त्यात्मकवाद्यपि न
भाविनः स्थायिना, तथापि वासनात्मनेह विवक्षिताः। दृश्टान्तेऽ
व्यञ्जनादिमध्ये कस्यचिद् वासनात्मकता स्थायिवत्, अन्यस्योद्भू
व्यभिचारिवत्। तेन स्थाय्येव विभावानुभावादिभिरूपचितो रसः। स्था
त्वनुपचितः। स चोभयोरपि, मुख्यतया वृत्त्या रामादावनुकार्ये, अनुक
च नटे रामादिरूपतानुसन्धानबलादिति।

ध्वन्यालोकलोचने–

"तथाहि पूर्वावस्थायां यः स्थायी स एव व्यभिचारिसम्पातादि
प्राप्तपरिपोषोऽनुकार्यगत एव सः। नाट्ये तु प्रयुज्यमानत्वान्नाअ्यरस इ
केचित्"

यद्यप्यत्र लोल्लटनाम नोक्तम्, तथाप्येतत्तन्मतमेवेत्यसन्दिग्धम
बालप्रियाख्यया टीकया ही सन्देहः सद्य एव निवार्यते। मम्मटोद्धृ
लोल्लटमतम्–

"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भाव
जनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियाग्यः कृत
व्यभिचारिभिनिर्वेदादिभिः सह।रिभिरूपचितो मुख्यया वृत्तया रामादावनुका
तद्रूपतानुसन्धानार्न्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रीाृतयः।"

एषामुद्धरणानामाधारेण भट्टलोल्लटमन्तव्यविषये तथ्यानीमा
लभ्यन्ते संयोगपदार्थो भताभिमत एव। स्थायिभावेन सह संयोगः इत्यर्थ
स्थायिभावाश्रयोऽनुकार्यो रामादिः। सीताद्यालम्बनानि अनुकार्यस्यैवचि
जनयन्ति। अत्र प्रसङ्गे उत्पत्तिरित, उद्भूततेति शब्दौ प्रयुक्तौ, यदाधारे
मम्टो "जनित" इति शब्दं प्रयुङ्क्त। अथैष प्रश्र उदेति यदत्रोत्पत्तिपदा
वस्तुतः "अभावे भावस्य कल्पना" इत्यस्ति, उद्बुद्धिमात्रं वेति। य
कस्यचिद्वासनात्मकता स्थायिवद् इति लोल्लटमतांशो नाभिनवटिप्पणि

तदा त्वयं केवलः शाब्दिको विवादः।यदा स्थायिभावो वासनात्मकतया विद्यते विभावश्च तमुद्बोधयत्येव, तदातूद्बुद्धावभिव्यक्तौ च नास्ति कोऽपि भेदः। परमियमभिनवटिप्पणी चेत्तदोत्पत्तेराधारोऽसत्कार्यवाद एव माननीयः स्यात्।

अनुभावपदार्थोऽपि न रसजन्याश्चेष्टाः, अर्थाच्छृङ्गार–रसमग्नस्यरामस्य चेष्टा नानुभावः, अपि तु भावानुवर्तिनो विकारा एवानुभावः। अनुपचितस्थायिभावस्य व्यभिचारभावानामप्यनुवर्तिनो न तूपचितस्थायिमावस्य। उपचितस्थायिभावो रसः, अतस्तदनुवर्तिनो विकारास्तु, स्थायिभावोपचयकारणानि भवन्ति यद्यपि भरतस्य शब्दावल्यां भावे विभावोऽप्यन्तर्भवति, तथाप्यत्रैतादृशार्थविशेषोपस्थापनमनपेक्षितम्। यद्ययमेवार्थोऽभीष्टोऽभविष्यत् तर्ह्यभिनवगुप्त एव स्वयमिदंकथन्न स्पष्ट्यकरिष्यत्। एतद्विपरीतं च मम्मटेन''तेषां रसकारणत्वेन गणनानर्हत्वाद्'' इत्युपेक्ष्यैते स्पष्टं स्थायिभावकार्यतया निरूपिताः। व्यभिचारिणः स्थायिसहभाविनो भवन्ति। किन्तु ''युगपज्ज्ञानानुत्पत्तिर्मनसो लिङगम्'' इत्यनुसारेण मनसि युगपच्चेतनाद्वयं न सम्भवतीति नियमेन स्थायिनां व्यभिचारिणां च सहभवःकथं शक्यते मन्तुम्? इतीयं शङ्का व्यभिचारिणः संस्काररूपेण स्थायिना सह भवन्ति न युगपत्स्थितिरूपेणेति समाधीयते। यदि च स्थायिनो वासनात्मकताविषय– धारणा स्वीक्रियते, तथापिद्वयोः सहभावः सिद्ध्यति। स्थायिनो वासनात्म– कताया सञ्चारिणां चोद्बुद्धयोद्भूततया वा स्थितेः समीवात्।

रसो मूलतो मुख्यतया चानुकार्यगतो भवित गौणरूपेणानु–सन्धानबलान्नटगतोऽपि। अभिनवोद्धृतायां वाक्यावल्यामनुसन्धानकर्ता नट एव, अनुस– न्धानबलात्तस्मिन्नपि रस उत्पद्यते इत्यत्रानुसन्धानशब्दो व्याख्यामपेक्षते। अनुसन्धानपदस्य संस्कृतसाहित्याचार्यैरनेकेऽर्थाः प्रस्तूयन्ते– आरोः, अभिमानः, याोजनञ्चेति। एतेषामाधारेणभिवोद्धते वाक्ये "आरोप" इत्यर्थः स्यात्। नटस्य स्वस्मिन् रामत्वाद्यारोः। अभिमानः ठत्यस्य नटस्य तत्कालं रामादिमानित्वम्, योजनामित्यस्य योजनेत्यस्य वा पूर्वं योऽहं नटोऽभवम् ''स एवाहमधुना रामोऽस्मि'' इत्यशुद्धानुसन्धानम्, ततः परञ्च रामोऽहम् इति शुद्धानुसन्धानमित्यर्थः।एषु त्रिष्वप्यर्थेषु स्थूलप्यर्थेषु स्थूलदृषा नास्त्यन्तरविशेषः। सूक्ष्मदृषा तु विचार्यमाणेषु स्फुटीभवतीदमन्तरम्।

इमे त्रयोऽपि शब्दास्तादात्म्ये द्योतयन्ति। आरोपे तादात्म्यबाह्मता,

अभमाने तादात्म्यान्तरिकता, शैवदर्शनस्य कदाचिदशुद्धानुसन्धानपर्यन्तास गतिः। योजने, तादात्म्पूर्णता, शैवदर्शनस्य शुद्धानुसन्धानकोटिपर्यन्तास गतिः।

अनुसन्धानशब्दस्य योजनार्थो न सिद्धयति। यतो नट एव रा इतीदशे शुद्धानुसन्धाने सञ्जाते नटगतो रसः पतीयमानो न स्यादपि सिद्ध एव स्यात्। इदमञ्चोद्धरणं रसस्य प्रतीयमानतायामेवधृतवैशिष्यट्यम्

एतत्तथ्याधारेणेयं लोल्लटस्य रसधारणा कल्पयितुं पुनः प्रयति शक्यते। अत्र प्रसङ्गे प्रथमं तावदिदं स्पष्टम्, यत्तस्य दृक्कोणो यथार्थवाद वस्तुपकश्च विद्यते, नात्मवादी नापि व्यक्तिपरक इति। अनया चैतिहासिक च दृष्टयाभिनवगुप्तोद्धरणान्येव प्रमाणिकतराणि मन्येरन, मम्मटसंशोधनानि परवर्तिनामात्मवादिनां रसकल्पनाया एव फलानि।

3– स्थितिदशायां लक्षणान्तरवैयर्थ्यात्।

4– माध्यस्थ्याद्यानन्त्यापत्तेः।

5– हास्यरसे षोढात्वाभावप्राप्तेः।

6– कामावस्थासु दशस्वसंख्यरसभावादिप्रसङ्गात्।

7– शोकस्य प्रज्ञथ्मं तीव्रत्वं कालात् तनुमाद्यदर्शनम्।

8– क्रोधोत्साहिरतीनाममर्षस्थैर्यसेवाविपर्यये हासदर्शननमिति विपर्ययस्य दृश्यमान त्वाचच।

शङ्कुकस्येमे चाक्षेपाः सर्वथा मान्या न सन्ति। स्थायिभाव एव रसत्वे परिणमतीति सिद्धान्तस्तावदुपक्रमादन्तं यावन्मान्य एव। लोल्लटस्तु तद्द्वभिन्नमेवर्थमकरोत्– अनुकार्यगतः स्थायिभाव इति। अनुकार्यविषये च मूलपात्रकविनिबद्धपात्रयोर्भेदं स्फुटीकर्तुं नापारयत्। तद्विवेचनस्य दुर्बलतमोऽयमेवाशः, तत एव च तन्मतखण्डननमुपाक्राम्यत।

अस्माद् दोषाद् दोषान्तरमेकं प्रभवति। स चायम्– यद्रसस्थितिः प्रत्यक्षेन्द्रियमानसिकभावाभिनना, तनुसारेण सुखदुःखात्मिका च जायते, यन्न मान्यम्।

निष्कर्षः– भट्टलोल्लटेन मीमांसादर्शनाधारेण उत्पत्तिवादः स्थापितः। तन्मतानुसारं विभावनाम् अनुभावानां व्यभिचारिभावानां च संयोगेन रसस्य उत्पत्तिर्भवति। भट्टलोल्लटेन संयोगशब्दस्य निष्पत्तिशब्दस्य च अर्थत्रयं गृह्यते– 1. विभावैः सह स्थायिभावानाम् उत्पोद्योत्पादकभावसम्बन्धः, तेन रसस्य निष्पत्तिः उत्पत्तिरित्यर्थः 12, अनुभावैः सह स्थायिभावानां गम्यग-

मकसम्बन्धः, तेन रसस्य निष्पत्तिः प्रतीतिरित्यर्थः। 3. व्यभिचारिभावैः सह स्थायिभावानां पोष्यपोषकभावसम्बन्धः, तेन रसस्य निष्पत्तिः पुष्टिरित्यर्थः।। लेल्लटानुसारेण लोकजीवने कण्वाश्रमस्य पार्श्वभूमौ जगदेकसुन्दर्याः शकुन्तलायाः साक्षात्कारेण दुष्यन्तस्य चित्ते सहसा रतिभावः समुत्पन्नः। आलम्बनरूपायाः शकुन्तलाया अनिद्येन लावण्येन, आवर्जकेन च व्यहारेण वनप्रदेशस्यतस्यां रमणीयभूमिकायाम् (उद्दीपनविभावेन) आश्रयरूपस्य दुष्यन्तस्य चित्तोऽयं स्थायी रतिभावोऽधिकमुददीप्यत। दुष्यन्तस्याङ्गान्यस्पन्दन्त, रोमाञ्चेन शरीरं पुलकितम्। एकतः शकुन्तलारूपलावण्येन तच्चित्ते हर्षः समुदरिच्यत, अपरतश्च वरणीयतादिप्रश्नेन चिन्तादयो (व्यभिचारिभावाः) विनायासं समचरन्, एतैश्च रतिभावोऽपुष्यतैव नाक्षीयत। इत्थं वातावरणरमणीय तादिप्रभावेणोद्दीपितः दुष्यन्तपूलकरोम–ञ्चादिभिरनुभावितः, हर्षचिन्तादिभिचारिभावैः परिपोषितः। अनया च प्रक्रियया तस्य स्थायिभावस्य पूर्णः परिपाकोऽभवत्, स च रसो निष्पन्न।

लोल्लटोद्धरणे तथ्यमिदमभिधया नोक्तम्, परं व्यञ्जनया सर्वथा गम्यम्। रसस्य हि सार्थकताऽनुकार्यानुकर्तृपर्यन्तसीमिता न शक्यते मानयितुम्। यदा समग्रस्यापि नाट्यप्रपञ्चस्यायोजनमेव सामाजिकस्य कृते वर्तते, तदास्य नाट्यप्रपञ्चस्य सार्थकतापि तमन्तरा न सिद्धयति। सामाजिकचमत्कारणेनैवास्यापि सार्थकतेति स्वतः सिद्धं व्यावहारिकं तथ्यम। एतस्य कृते तर्कशास्त्रदर्शनं वा नापेक्ष्यत। भरतस्यापीदमेव मतम्। तदेवाश्रित्य लोल्लटप्रवृतिः।

भरतवच्च लोल्लटोऽपि मन्यते यत्स्थायिभाव एव विभावानुभाव–दिसहयोगेन रसत्वे परिणमतीति। यथा–

क– नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति इति भरतः

ख– तेन स्थायि विभावानुभावादिभिरूपचितोः रसः इति लोल्लटः।

लोल्लटकल्पितो हि रसः सहृदसस्य कृते स्वास्वाद्य एवास्ति। सहृदयस्य स्वकीयमास्वादं लोलल्टो रसं न मन्यते, अपितु रसपरिणामम्। भरतलोल्लटयो रसकल्पनाया इमावेव सूक्ष्मौ भेदौ।

संस्कृतकाव्यशास्त्रे लोल्लटमतस्य दोषाः सर्वविदिताः सन्ति। अभिनवभारत्यनुसारेण शङ्कुकेन लोल्लटविरोधेऽष्टावाक्षेपाः कृताः।

1– विभावाद्ययोगे स्थायिनो लिङ्गभावेनावगत्यनुपपत्तेः।

2– भावानां पूर्वमभिधेयताप्रसङ्गात्।

काश्मीरसाहित्यपरम्परायां विष्णुधर्मोत्तरपुराणस्यावदानम्

डॉ. नरेश बत्रा
एसोसिएट प्रोफेसर स.ध.आदर्श संस्कृत
महाविद्यालय, अम्बाला।

जम्मूकश्मीरप्रदेशे पुराणसाहित्यस्यापि रचना नाता । तत्र त्रयाणामुपपुराणानां गणना क्रियते ।

1. विष्णुधर्मोत्तरपुराणम् ।
2. नीलमतपुराणम्।
3. वासुकिपुराणम् ।

त्रिष्वेतेषु उपपुराणेषु विष्णुधर्मोत्तरपुराणस्य विश्वकोषरूपेण मान्यता स्वीक्रियते। पाश्चात्त्य विन्टरनिरजमतानुसारमस्योपपुराणस्य रचनाभूमिः पञ्जाब प्रान्तस्योत्तरे भागे पार्वत्यः प्रदेशः विद्यते य खलु कश्मीरस्य दक्षिणः प्रदेशः कथ्यते । एषः प्रदेशः वर्तमाने डुग्गरप्रदेशः स्वीक्रियतेऽथवा जम्मू पार्श्ववर्तनः प्रदेशः मन्यते। विष्णुधर्मोत्तरपुराणस्य रचयितुः नाम्नः ज्ञानमस्माकं नास्ति परमेतस्य रचयितुः डुग्गरप्रदेशस्य भौगौलिकं ज्ञानं सुतरां प्रौढं प्रतीयते। देविका–सिन्धु–वितस्ता–चन्द्रभागा–इरावतीं– विपाशा –शतद्रुप्रभृतीमेतद्देशीयानां नदीनां सः प्रशंसां करोति । चन्द्रभागातविषीनद्योः संगममसौ त्रिविधं कथयति । तविषीनद्याः जलं शीतोष्णं चन्द्रभागायाश्च जलं शीतामलमस्तीति तथ्यपरकं वर्णनमस्य रचयितारमत्रत्यं निवासिनं प्रमाणयति । अस्मिन् पुराणे देविका सिंहवाहिनी, चन्द्रभागा च हंसवाहिनी कथिता । देविकातीरे भूधरस्य उपासनाया विधानं भवतीति हयानि शालीनां विविधप्रकाराणांमुल्लेखः इत्यादीनि तथ्यानि सङ्केतयन्ति यत् विष्णुधर्मोतरपुराणस्य रचना डुग्गरप्रदेशे एव जाता ।

अस्योपपुराणस्य्य रचनाकालः ईस्व्याः चतुर्थशताब्दत परतरः पञ्चमशताब्दसमीपतरः समयः प्रतीयते ।

विष्णुधर्मोत्तरपुराणस्य त्रयः खण्डाः सन्ति। तृतीयखण्डस्यादौ वज्रः ऋषिं मार्कण्डेयं परलोके इहलोके च सुखोपलब्धेरुपायं पृच्छति। अग्रिमप्रसङ्गे देवानां मूर्त्तयः किंप्रकारका स्युरिति सन्दर्भे चित्रसूत्रस्य

चर्चा कृता। चित्रकलाया ज्ञानं नृत्यशास्त्रज्ञानं विना न सम्भवति। नृत्यकला वाद्यसङ्गीतं विना न सिध्यतीति। वाद्यसङ्गीतस्याधारः गीतशास्त्रमस्ति। अतः गीतशास्त्रस्य ज्ञानं सर्वतोभावेन सम्पादनीयमिति प्रतिपाद्य संस्कृते, प्राकृते, अपभ्रंशभाषासु, विविधदेशीयभाषासु रचितानां गीतानाम् उल्लेख, कृतः । ततश्च विभिन्नानां छन्दसांम् अलङ्काराणां, रसादीनां च विवरणं दृश्यते । सप्तदश अध्यायतः 31 अध्यायपर्यन्तं रूपकभेदाः, उपभेदाः, नायकलक्षणम्, नायिकालक्षणम्,रसानां, भावादीनां च वर्णनमंत्र प्राप्यते ।

यत्सत्यं पुराणमिदं विश्वकोष वरीवर्ति। अस्मिन्नुपुराणे उपनिषद्भ्यः महाभारत–नाट्यशास्त्र–पाराशरस्मृति–याज्ञवल्क्यस्मृति मनुस्मृति प्रभृतिभ्योऽनेकेभ्यः ग्रन्थेभ्यः विषयाः सङ्गृहीताः सन्ति । अत्र हि सृष्टि क्रम–भूगोलविद्या–खगोल विद्या–वंशाबलि–व्रत–श्राद्ध–पूजा–व्यवहार–राजनीति–पाप–पुण्य–प्रायश्चित–शरीरविज्ञान–भैषज्य–मानवचिकित्सा–पशुचिकित्सा–विषचिकित्सा–स्त्रीरोग–चिकित्सा–पाकशास्त्र–रसायन विज्ञान–उद्यान विज्ञान– व्याकरणशास्त्रकोशरचनाशास्त्र–छन्दःशास्त्र–लंकारशास्त्र–गीत–वाद्य–नृत्य–नाट्य–मूर्तिकला–चित्रकला–वास्तुकलाप्रभृतीनां मनेके विषयाः सङ्कलिताः सन्तः महान्तं चित्रं जनयन्ति।

डॉ. राजेन्द्र चन्द्रहज़रा प्रमाणमति यत् मत्स्यपुराणे विष्णुधर्मोत्तर–पुराणस्य बहुत्मः अंशः स्वीकृतः । भामहस्य दण्डिनश्चापि पुराणेनानेन परिचयस्तेन साचितः । उमाभ्यां स्वग्रन्थेषु पुराणस्यास्य वस्तुनः प्रयोगः कृतः इति तन्मतमादरणीयमेव ।

जम्मूकाश्मीरस्य दक्षिणे भागे विरचितस्य विशालकायस्य भारतीयसंस्कृतेः विश्वकोशस्य विष्णुधर्मोत्तरनाम्नः उपपुराणस्य काश्मीरकाव्यशास्त्रपरम्परायामपि योगदानं विद्वद्भिरङ्गीकरणीयमेवेति।

संस्कृत शास्त्र परम्परायाः संवर्धने उद्भट भट्टस्य योगदानम्

डॉ. प्रतिभा,
सहायक प्रोफेसर, संस्कृत विभाग,
जम्मू विश्वविद्यालय, जम्मू

काश्मीरीया वसुधा अनेकेषां साहित्यकाराणां संस्कृत समुपासकानाम् आचार्य प्रवराणां साधनास्थली। उद्भटवामनकुन्तक-आनन्दवर्धन–अभिनवगुप्त मम्मट भामह वामन रुद्रट भटलोल्लर श्री शङ्कुकभट्टनायकमुकुलभट्ट, भट्टतौतमहिमभट्ट क्षेमेन्द्रमम्मट रुय्यक जयरथ शोभाकर मित्रादयः अस्यामेव धरण्यां साधनां चक्रः। एते आचार्याः स्वीयमौलिकाभिः उद्भावनाभिः भारतीयसाहित्यशास्त्रं संवर्धितवन्तः। संस्कृतशास्त्राणाम् अलङ्काररीतिरसध्वनिवक्रोक्तिवादानां काश्मीर भूरेव जननी।

संस्कृतसाहित्यशास्त्रे अलङ्कार समर्थकेषु आचार्येषु उद्भट्भट्टस्य स्थानं विशिष्टम्। उत्तरवर्त्तिनां सर्वेषाम् आचार्याणाम् अयं आदरभाक्। उद्भट्टस्य पक्षस्य विरोधिनां हृदयेषु अपि अस्य महत् सम्मानम्।

पण्डित आनन्दवर्धनाचार्यः लिखति– "अन्यत्र वाच्यत्वेन प्रसिद्धो यो रूपकादिरलंकारः सोऽन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः[1]।" अप्पयदीक्षितिस्तु स्वग्रन्थस्यादावेव निगदतिं –

"इह हि भामहोद्भट्टप्रभृतयश्चिरन्तनालंकाराः[2]।" साहित्यमर्मज्ञः रुय्यकः व्यक्तिविवेकटस्य टीकायां व्यलिखात्– "इह हि चिरन्तनैरलङ्कारतन्त्रप्रजापतिभट्टोद्भट्प्रभृतिभिः शब्द धर्मा एवालङ्काराः प्रतिपादिता नाभिधाधर्मा।" विद्वदशिरोमणिः पण्डितराजः जगन्नाथः

1– ध्वन्यालोकः

2– अलङ्कारसर्वस्व

रसगङ्गाधरनामके ग्रन्थे अनेकत्र उद्भटम्प्रति महदादरं प्रदर्शयति। उदाहरण रूपेण– "अत्राहुरुद्भटाचार्याः। येन नाप्राप्ते य आरभ्यते स तस्य बाधक इति न्यायेनालंकारान्तर एवायभाभारायमाणोऽलंकारान्तर बाधते।"

वस्तुतः उद्भटभट्टः प्राचीनतम् भामहमप्यतिशेते। राजतरङ्गिण्यां कल्हणेन महाराज्ञः जयापीडस्य सभापतिरूपेणायं वर्ण्यते। तद्यथा–

विद्वान् दीनारलक्षेण प्रत्यहं कृतचेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः।।

आनन्दवर्धनाचार्यस्यापि उल्लेखः राजतरङ्गिण्याम्–

मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः।
प्रथां रत्नाकरश्चागात साम्राज्येऽवन्तिवर्मण।।

राज्ञजयापीडस्य राज्यकालसमय वि.सं.836–870 आसीत्। महाराज्ञ अवन्तिवर्मणः राज्यकाल 912–945 आसीत्। आनन्दवर्धनोऽपि अनेकत्र उद्भट्टस्य उल्लेखं करोति परम् उद्भटेन कुत्रचिदपि आनन्दवर्धनाचार्यस्य ध्वनेः मतस्यैव उल्लेखः न विहितः। एतैः सर्वैः वृत्तै उद्भट्स्य कार्यकाल वैक्रमाब्दे नवमशाताब्धा पूर्वार्द्धे अनुमातुं शक्यते।

भट्टस्य उद्भटस्य त्रयः ग्रन्थाः उपलभ्यन्ते–

1–भामहविवरणम् 2–कुमारसम्भवम्

3–अलङ्कार सारसंग्रहश्च उद्भटस्य त्रयेषु ग्रन्थेषु भामहविवरणम्, कुमारसम्भवकाव्यम् अद्य न प्राप्येते पर विदुषां ग्रन्थानधिकृत्य एतयोः किञ्चित् वर्णनम् अत्र प्रस्तूयते। प्रतिहारेन्दुराजरूय्यकयोः[1-2] अभिनवगुप्तस्य[3] च कथनैः भामहविवरणस्यारितत्त्वं ज्ञायते।

भट्टस्य उद्भटस्य कुमार सम्भवकाव्यस्य कालिदासस्य कुमारसम्भवेन महत् सादृश्यं दृश्यते। तद्यथा–

उद्भटस्य–

प्रच्छन्ना शस्यते वृत्तिः स्त्रीणां भावपरीक्षणे।
प्रतस्थे धूर्जटिरतस्तनुं स्वीकृत्य वाटवीम्।। 2.10

1– प्रतिहहरिन्दुराजकृतलघुविवृतिटीका
2– अलङ्कारसर्वस्व
3– ध्वन्यालोकलोचन

कालिदासस्य–

विवेश कश्चिजजटिलस्तपोवनम्

शरीरवद्धः प्रथमाश्रमो यथा।। का.श. 5.12

उद्भटस्य–

अपश्यच्चातिकष्टानि तप्यमानांतपांस्युमाम्।

असंभाव्यपतीच्छानां कन्यानां का परा गतिः।। (2.12)

कालिदासस्य–

इयेष सा कर्तुमवन्ध्यरूपताम्।

समाधिमास्थाय तपोभिरात्मनः।

अवाप्यते वा कथमीदृशं द्वयं

तथाविधं प्रेम पतिश्च तादृशः।। कु.सं. 5/2

उद्भटस्य–

शीर्णपर्णाम्बुवाताशकष्टेऽपि तपसि स्थिताम्।। (2.1)

कालिदासस्य–

स्वयं विशीर्णद्रुमपर्णवृत्तिता

परा हिं काष्ठा तपसस्तया पुनः।

अलङ्कारसारसंग्रहे – उद्भटेन एकचत्वारिंशत् अलङ्काराणां लक्षणानि सोदाहरण प्रस्तुतानि। सर्वे अलङ्कार षट्सु वर्णेषु परिगणिताः–

प्रथमवर्गे–पुवरूक्तवदाभास, छेकानुप्रास (पुरुषा, उपनागरिका, कोमला ग्राम्या वा) त्रिधा अनुप्रासः, लाटानुप्रासः रूपकम्, उपमा दीपक प्रतिवस्तूपमा च।

द्वितीयवर्गे–आक्षेपः अर्थान्तरन्यासः, व्यतिरेकः, विभावना, समासोक्ति, अतिशयोक्तिः

तृतीयवर्गे– यथासंऽख्यम्, उत्प्रेक्षा, स्वभावोक्तिः

चतुर्थवर्गे– प्रेयस्, रसवत्, ऊर्जस्विन्, पर्यायोक्तम्, समाहितम्, उदात्तः, श्लिष्टम्।

पञ्चमवर्गे–अपह्नुतिः विशोषोक्तिः, विरोध, तुल्ययोगिता, अप्रस्तुत प्रशंसा, व्याजस्तुति , निदर्शना, उपनेयोपमा, सहोक्तिः, संकरः ।

षष्ठवर्गे– अनन्वयः ससन्देहः, उपमेयोपमा, सहोक्तिः, परिवृत्तिः।

उद्भटभामहयोः साम्यम्–

उद्भटः भामहस्यानुयायी। सः भामहस्य काव्यालङ्कार ग्रन्थस्य भामहविवरणनाम्नीं टीकाम् कलेखि। उद्भटस्य अलङ्कारसारसंग्रहे भामहस्य काव्यालङ्कारस्य महान् प्रभावः दृश्यते। अलङ्काराणां लक्षणेषु पर्याप्तं साम्यं वर्तते। क्रमोऽपि तादृश एव। उभावेव अलंकारान् काव्यस्य प्रमुखतत्त्वरूपेण स्वीकूरूतः। एतत् सत्यं यत् अलङ्कारस्य श्रीवृद्धौ उभयोः एव योगदानम्।

उद्भटस्य वैशिष्टयम्—

उद्भटस्य ग्रन्थे अनेके एवमभूताः अलङ्काराः येषां भामहस्य ग्रन्थे अभावः। भामहस्य च ग्रन्थे वर्णितानाम् अनेकेषाम् अलङ्काराणाम् उद्भटस्य ग्रन्थेऽभावः। भामहः अनुप्रासस्य भेद्वयं स्वीकरोति— ग्राम्य वृत्तिः, उपनागरिका वृत्तिश्च। रूपकयापि द्वौः भेदौ वर्णयति। परम् उद्भटस्तु पुरुषावृत्तिमपि वर्णयति। रूपकस्यापि चतुरः भेदान् सः स्वीकरोति। भामहमतेश्लेषालङ्कारः त्रिधा परं उद्भटः द्विधा मनुते।

अलङ्काराणां स्वरूपनिर्धारणे पूर्ववर्त्तिनीं परम्परां स्वीकुर्वन्नपि उद्भटः तां परिष्कृत्यैव प्रस्तौति। भामहदण्डीभ्यां वर्णितान् अनेकान् अलङ्कारान् निरस्यति। अलङ्काराणां षट्सु वर्गेषु विवेचनम्, ध्वनेः अलङ्कारेषु अन्तर्भाव इत्यादि उद्भटस्य मौलिकं चिन्तनम्। भामह दण्डीभ्याम् अलक्षितान्, अल्पलक्षितान्, अव्यवस्थितान् अलङ्कारान् परिस्कृत्य परवर्त्तीनाम् अपि साहित्यकाराणां कृते पथप्रर्शनम् अकरोत् इति संस्कृत साहित्यक्षेत्रे उद्भटस्य महनीयं योगदानम्।

काव्यशास्त्रे महाकविबिल्हणस्य दृष्टिः

योगेश कुमार अवस्थी
शिक्षाचार्यः
श्री रणवीर परिसर
कोट-भलवाल, जम्मू

विपुलतमे संस्कृतसाहित्ये न सम्प्राप्यते किमपि काव्यशास्त्रीयं ग्रन्थरत्नं महाकविबिल्हणस्य यदि, तत्कथं वा कुत्र निरूपिता वर्तते, तस्य काव्यशास्त्रीयदृष्टिरित्ययं प्रश्नो विदुषां समक्षं पौनः पुन्येन समायात्येवेति नास्त्यत्र कोऽपि सन्देहलेशः ।

निश्चप्रचं निखिलायामपि काव्ययात्रायां स्पन्दमाने स्वकीये जीवने तेन काश्मीराभिजनेन महाकविना बिल्हणेन न व्यरचि कश्चिदपि काव्यशास्त्रीयतत्त्वव्याख्याप्रधानो ग्रन्थः, किन्तु पुञ्जीभूता तस्य समग्रापि प्रतिभा सर्वात्मना नृत्यन्तीव प्रसभं सहृदयानां मनांसि चावर्जयन्तीव चकासति विकमाङ्कदेवचरिते महाकाव्ये इति तदभियानोपलब्धेषु वा तद्रचितेषु वा तत्कथितेषु समस्तेष्वपि तद्वांग् विजृम्भितेषु विक्रमाङ्कदेवचरितम् सर्वाधिकां प्रतिष्ठां महत्त्वमालिकां च बिभर्ति। तद्धि भ्राजमानं विल्हणस्य कविव्यक्तितत्त्वं सर्वात्मना समभिव्यवतमेतास्मिन् महाकाव्ये। कविह्रदये काव्यस्य यादृशी समवधारणा भवति, वा यया विशिष्टसर्जन प्रक्रिया सहसा काव्याध्वनिः प्रचलति, पुनश्च तत्सृष्टस्य काव्यस्य कलात्मकं यन्मूल्यं भवति, तेषां समेषां साक्षित्वं केवलं कविः तूलिकाग्रथिता रचनैव धारयति। एतदेव कारणं यत् महाकविविल्हणप्रणीते महाकाव्ये विक्रमाङ्कदेवचरिताख्ये तस्य काव्यालोचनस्य पर्याप्तसङ्केतः सम्प्राप्यते। काव्यसम्बन्धिनी तस्य दृष्टिः पूर्वतनानां कवीनां कृते तस्य मनोभावना स्वीयका व्यसर्जनात्मिका विशेषताश्च तत्र सम्यक्तयाभिव्यक्ता। सर्वथा विज्ञातमिदं तथ्यं यत् प्राचीनाचार्यैः साहित्यविधाविशेषज्ञैः काव्यरचना-सरणिपार्थक्यं स्पष्टीकर्तुं वैदर्भीगौणी पाञ्चालाख्यानां तिसृणां रीतीनां समाकलनं कृतम्। विल्हणेन स्वकीयं मार्गं सुष्टु विज्ञाय निगदितञ्च- अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः। वैदर्भरीतिः कृतिनामुदेति

सौभाग्यलाभप्रतिभूः पदानाम्।

अत्र वैदर्भी स्वीकर्तुं हेतुत्रयमुपन्यस्तं कविना । यथाश्रवणामृतस्य अनभ्रवृष्टिः सरस्वत्या विलासोद्गमः पदानां सौभाग्यलाभे प्रतिभूत्वस्य भूमिकाया काव्यस्य वैदर्भीशैली यया रीत्या कविः सततमनन्दं सृजति, सैव अनभ्रवृष्टिरित्यनेन प्रयोगविशेषेण कथिता । काव्यभाषा कविकल्पनयोः सहजता स्वतः फूर्तरमणीयता च वैदर्भी प्रयासादेव सम्प्राप्यतें वैदर्भशैल्याः पदयोजनायामर्थाभिव्यक्तेरियं प्रक्रिया सौभाग्यलाभप्रतिभूः पदानामित्यनेन प्रयोगविशेषेण सूचिता । काव्यसर्जनप्रक्रियायां पदैरर्थस्यानायास समर्पणं कविना काव्यघटनानुकूलस्य सर्वथा समुचितस्य पदार्थस्योपस्थापनमेव सौभाग्यलाभः । अर्थात् काव्यार्थस्य प्रकाशने यत्समुचितं सामर्थ्य अतदेव सौभाग्यं पदानाम् वैदभीर्प्रयासादेवैतद्विधं सौभाग्यं पदैः सम्प्राप्यते इति।

क़ाव्यनिर्माणक्षेत्रे नूतनप्रयोगकरणे नूतनमार्गान्वेषणे विल्हणस्य महनीया रुचिवर्तते। प्रौढ़िप्रकर्षेण पुराणपरिपाट्या अपि अतिक्रमणं तदृष्ट्या श्लाध्यम्। अत्र प्रौढ़िना प्राचीनालङ्कारिकाणां प्रौढिनामको गुणोऽपितु ध्वन्यलङ्कारादिसन्निवेशः ।

तेन कथितम् —

प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाध्यतमः पदानाम्।
अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि।

एताभिर्भङ्गिमाभिः काव्यसर्जनं प्रति बिल्हणस्य नूतना दृष्टिः सौस्पष्ट्यं भजन्ती, पूर्वतनानां श्रेष्ठकवीनां प्रति स्वकीयां समादरभावनामपि विशेषेण प्रकटयति।

काव्यसिद्धान्ते यत्रैते वक्रोक्त्यलङ्कारादीनां समुचितस्थानं स्वीकुर्वन्तो ध्वनिसम्प्रदायमनुयान्ति तत्रैव रसध्वनेः कवित्वात्काव्यसर्जनायां चित्रोक्तिवक्रोक्तिवैचित्र्याणां कृते तस्य समादरभावोऽपि सर्वत्र द्योतते।

यस्मिन् काले जनिमलभद् बिल्हणक्तस्मिन् काले काव्यसर्जनस्य परम्पराद्वयी प्रचलिता आसीत्। प्रथमाऽसीद् व्यास–वाल्मीकि–कालिदासादीनां परम्परा परा चासीद् भारविमाधादीनां परम्परा उत्तरकालीनत्वाद् माघादीनां काव्यपरम्परा तस्मिन् कालेऽधिकं प्रवृत्तासीत् तथापि काव्यशास्त्रीयसिद्धान्तानां सम्यगवबोधतयैव स्वीययुगप्रवृत्तया स्वात्मानं सर्वथा दूरीकृत्य तेन कविना कालिदासपरम्परा अनुगमने प्रयासो विहितः । काव्यसर्जनेन सहैव काव्यास्वादग्रहणप्रक्रियायाः अपि सङ्केतो बिल्हणेन प्रदत्तः । काव्यास्वादाय विशिष्टव्युत्पत्तेरर्जनमावश्यकम्। एषा विशिष्टव्युत्पत्तिरेव जडत्वात्पृथक्कृत्वा

कोविदपदं नयति श्रोतारम्व्युत्पत्तिरावर्जितकोविदापि न रञ्जनाय क्रमते जडानाम्। न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः।

तैर्ज्ञातुं शक्यते यैर्जडेषु प्रतिभा दृश्यते।

जडेषु जातप्रतिभाभिमानाः टवलाः कवीन्द्रोक्तिषु के वराकाः।
प्राप्ताग्निनिर्वापणगर्वमम्बु रत्नाकरज्योतिषि किं करोति ।।

बिल्हणदृष्ट्या सूक्तिमर्मपरीक्षा विचारशाणोपलपट्टिकोपरि करणीया।

कथासु ये लब्धरसाः कवीनां ते नाऽनुरज्यन्ति कथान्तरेषु।
न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ।।
उल्लेखलीला घटना पटूनां सचेतसां वैकटिकोपमानाम्।
विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नान्यतिथीभवन्तु ।।

अर्थात् व्युत्पत्तिं धारयित्वा काव्यालोचनामृतकुण्डे निरन्तरम् अवगाहन कृत्वा असत्काव्यविवेक दृष्टिमर्जायित्यैवव सत्काव्या स्वादकत्वं सम्प्राप्तुं शक्यते।

यः कविः काव्यस्वरूपं प्रति, काव्यालोचनसिद्धान्तान् प्रति सर्वथा जागरुकत्वं विभर्ति तस्य रचनासु निश्चप्रचं प्रोत्कृष्टता समायाति बिल्हणेन स्वकीयया विमलया दृष्ट्या वैदर्भरीत्या महत्वं विज्ञातम्। अतएव वैदर्भरीत्या आश्रयणं विक्रमाङ्कदेवचरिते गृहीतम्। तस्य वैदर्भरीतियाश्रयो बहुशः स्मारयति, कविकुलगुरुं कालिदासम्। प्रसादगुणवत्ता रचनाया सम्पन्नता चैतस्या वैदर्भरीत्या विशेषताः । बिल्हणस्य रचना पूर्वोक्ताभिर्विशेषताभिः सम्पन्ना हृद्यालङ्कारयोजनया सह हठाद् भावकानां भावुकानां मनांसि मोदयति।

मृणालसूत्रं निजवल्लभायाः समुत्सुकश्चाटुषु चक्रवाकः।
अन्योन्यविश्लेषणयन्त्रसूत्रभान्त्येव चम्चुस्थितमाचकर्ष ।।

प्रभातबेलायां परस्परकेलिक्रियायां संलग्नस्य चक्रवाकमिधुनस्य वर्णने कल्पिते, रमणीया कल्पना बिल्हणस्य महनीयं काव्यसामर्थ्यमुद्घोषयति। अनेनैव प्रकारेण प्रत्यूषकालीनस्य भगवतः सूर्यस्य सिद्धाङ्गनाप्रदत्त-कुङ्कुमार्घ्यस्य स्थितिं कविः वर्णयति।

आरक्तमर्घ्यार्पणतत्पराणां सिद्धाङ्गनानामिव कुङ्कुमेन।
बिम्बं दधे बिम्बफलप्रतिष्ठा राजीविनीजीवितवल्लभस्य ।।

पदाशय्यया सह लालित्यं, लालित्येन सह सुकुमारकल्पना, कल्पनया सह रम्यवर्णना, वर्णनया सह रसपर्यवसायिनाम् अलङ्काराणां संयोजनं महाकवीनां नूनमत्युत्कृष्टायां श्रेष्ठश्रेण्यां समानयति बिल्हणम्।।

साहित्यशास्त्रपरम्परायां मम्मटमहोदयस्य योगदानम्

प्रमोदकुमारशुक्लः
शिक्षाचार्यच्छात्रः
श्री रणवीर परिसर
कोट-मलवाल, जम्मू

साहित्यशास्त्र परम्परायां नैके विद्वांसः स्वस्वपक्षतः महद् योगदानं कृतवन्तः। तेषु यथा – भामहः, कुन्तकः, क्षेमेन्द्रः, जगन्नाथः पण्डित विश्वनाथः आनन्दवर्धनादयः अभवन्। क्रमेऽस्मिन् आचार्यमम्मटमहोदयस्य योगदानं साहित्यशास्त्रे अद्वितीयं वर्तते। तेन साहित्यशास्त्रपरम्परां वर्धनाय काव्यप्रकाशः इति ग्रन्थस्य रचना कृतवान्। सः ग्रन्थः अधुना सम्पूर्ण साहित्यशास्त्रस्य दर्पणमिव वर्तते। अधुना तमेव अधीत्य साहित्यपरम्परा अधुना पर्यन्तमं अग्रे वर्धमाना वर्तते। ग्रन्थेऽस्मिन् आचार्यमम्मटेन काव्यस्य लक्षणं, प्रयोजनं, प्रकाराः, अलङ्काराः तथा च रसस्य विवेचनां कृतम्। तेन स्वस्य ग्रन्थे काव्यप्रकाशे कस्यचित् मतस्य खण्डनं नैव कृतम् अपितु सर्वेषं मतानां अध्ययनं कृत्वा तेषां मतानामोपरि तर्कशक्त्या तथा च समन्वयपूर्वकं स्वस्य मतस्य प्रतिष्ठापनं कृतवान्। तेन काव्यप्रकाशे सर्वप्रथमं काव्यस्य हेतुं प्रतिपादति यथा – काव्य हेतु –

शक्तिर्निपुणता लोकशास्त्र काव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यासः इति हेतुस्तदुद्भवे ।।

शक्तिः कवित्त्वबीजरूपः संस्कारविशेषः यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकस्य लोकवृतस्य शास्त्राणां छन्दोव्याकरणाभिधान कोशकला चतुर्वर्गगजतुरगखड्गादिलक्षणं ग्रन्थानां काव्यानां च महाकविसम्बन्धिनिम् आदि ग्रहणादितिहासादीनां च विमर्शनाद् व्युत्पत्तिः काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशकरणे योजने च पौनः पुन्येन प्रवृत्तिरितित्रयः समुदिताः न तु व्यस्ताः तस्य काव्यस्य उद्भवे निर्माणे समुल्लासे च हेतुः न तु हेतवः इति।

आचार्य मम्मटेन काव्यस्य हेतुं प्रदर्श्य पुनः काव्यस्य लक्षणं प्रतिपादयितुं काव्य लक्षणमाह –

तददोषौ शब्दार्थौ सगुणवनलङ्कृती पुनः क्वापि ।

लक्षणमेतत् काव्यस्य स्वरूपं सर्वाङ्गत्वेन व्यवस्थापयति। अत एव काव्यशास्त्रज्ञैः लक्षणमेतत् बाहुल्येन स्वीक्रियते। अत्र पूर्वाऽचार्यैः स्वीकृतं शब्दार्थयोर्महत्त्वं पूर्ववतोपस्थाप्यतेकाव्ये प्रसादादिगुणानां महत्त्वं अत्र स्वीक्रियते। काव्य उत्कटदोषाऽभावे अपि विशेषतोऽवधानं दत्तम्। अनलङ्कृति पुनः क्वापि इत्यनेन अलङ्काराणां गौणत्त्वं प्रतिपाद्यते तदभावोऽपि न काव्यत्त्व हानिः । आचार्य मम्मटः सर्वप्रथमं तु अत्र शब्द–अर्थ–द्वयोः समष्टिरूपं स्वीकरोति। एकाकी शब्दः भवतु,अर्थः शब्द–अर्थ–द्वयोः समष्टिरूपं स्वीकरोति। एकाकी शबदः भवतु, अर्थः वा कस्यचिदपि काव्यं नैव भवति अत्र तत् शब्दः सर्वनां वत् यस्य चर्चा आचार्येण पूर्वतनी कारिकायां कृतम्। अतः आचार्यस्य मतमस्ति यत् द्वयोः सम्लितं रूपं एव काव्यं भवितुमर्हति। शब्दः अर्थः द्वोत कीदृशौ भवतः अस्योद्घाटनं कुर्वन् आचार्यमम्मटः बोधयति यत् शब्दार्थः अदोषौ भवेतां, पुनश्च सगुणौ माधुर्यादिगुणैः युक्तः स्यात्।

तृतीया वार्त्ता साधारणतया तत् अलङ्कार युक्तः स्यात् परञ्च यत्र कुत्रापि रसादीनां प्रतीतिः भवति। तत्र अलङ्कार विहीने सत्यपि कार्य प्रचलिण्यति। एवं रीत्या त्रिभिः गुणैः युक्तः शब्दार्थस्य समूहस्य नामैव काव्यम् इति। क्रमेऽस्मिन् काव्यस्य भेदाः प्रदर्शिता आचार्येण मम्मटेन। काव्यप्रकाशे त्रयाणां काव्यभेदानां वर्णनं प्रतिपादितम् तद्यथा–

1) **उत्तमकाव्यम्** –इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः इदमिति काव्यं बुधैः वैय्याकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः । ततस्तन्मतानुसारिभि अन्यैरपि न्यग्भावित् वाच्यव्यंग्यव्यंजन लक्षणस्य शब्दार्थयुगलस्य। यथा –

निःशेषच्युतचन्दनस्तनतटं निर्मिष्टरागोऽधरो।
नेत्रे दूर मनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मित्थ्यावादिनि इति वान्धवजनस्याज्ञात् पीडागमे ।
वापिं स्नातुनितोगतासि म पुनस्तस्याऽधमस्यान्तिकम् ।।

अत्र तदन्तिकमेवरन्तुं गतासीति प्राधान्येनाधमपदेन व्यञ्ज्यते।

2) **मध्यमकाव्यम्** –अतादृशी गुणीभूत व्यंग्यं व्यंग्येतु मध्यमम् ।

गुणीभूतव्यंग्ये वाच्यस्य प्राधान्यं भवति। परन्तु व्यङ्गयं गौणरूपेण तिष्ठति यथा –

ग्राम–तरुणं तारुण्या नवमंजुलमजरीसनाथकरी।
पश्यन्त्या भवति मुहुर्नितरां मलिनामुखच्छाया ।।

अत्र मञ्जुललता गृहे दत्तसङ्केतनागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात्।

3) **अधमकाव्यम्** –शब्दचित्रं वाच्यचित्रमव्यङ्गयम् त्ववरं स्मृतम् ।।

चित्रमिति गुणालङ्कारमुक्तम्। अव्यंग्यमिति स्फुटप्रतीयमान रहितं अवरमधमम् । यथा –

स्वच्छन्दोच्छलदच्छकच्छकुहरच्हातेतराम्बुच्छटा ।
मूर्च्छन्मोहमहर्षि हर्ष विहितस्नानाहिनकाहनाय वः ।
भिद्यादुधदुदार दर्दुरदरी दीर्घा दरिद्रद्रुमा ।
द्रोहोद्रेकमहोर्मिमेदुरभदा मन्दाकिनी मन्दताम् ।।

श्लोकेऽस्मिन् नास्ति व्यंगत्वं केवलं शब्दचित्रमेव दृश्यते अस्यैव नामाधमकाव्यं वर्तते। उपरोक्तरीत्या मम्मटाचार्येण महाकाव्यस्य भेदाः उपस्थापिताः । अन्येऽचार्यापि काव्यस्य भेदाः उपस्थापिताः। अन्येऽऽचार्येण अपि अस्याभिमतस्य समर्थनं कृतवन्तः। आचार्य मम्मटेन काव्यस्य भेदान् प्रदर्श्य काव्यप्रयोगनमुक्तं तद्यथा–

यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः पर–निवृत्तये कान्तासम्मिततयोपदेशयुजे ।।

अत्र आचार्यमम्मटेन प्रतिपादितं यत् किमर्थ काव्यम् ? अस्माकं जीवने काव्यस्य का आवश्यकता वर्तते ? एतेषां प्रश्नानां उत्तरं यंच्छन, बोधयति मम्मटाचार्यः। काव्यं यशप्राप्तये, व्याहारज्ञानाय, अनिष्टस्य सद्यः निवृत्तये तथा च कान्तेव अनुकूलोपदेशाय काव्यस्यावश्यकता वर्तते। क्रमेस्मिन् आचार्यमम्मटेन शब्दशक्तिविषये प्रतिपादितं यत् शब्दस्य शक्तिः शब्द शक्तिः। तथा शक्त्या एव शब्दः अभिष्टार्थम् प्रकाश्यते। यदि शब्देषु शक्तिः न स्यात् तर्हि कृते अपि प्रयत्नेऽर्थ बोधो न स्यात्। यथोक्तं वाक्यपदीयकारेणभर्तृहरिणा विषयत्त्वमापनैः शब्दैर्नार्थः प्रकाश्यते ।

न सत्तयैव तेऽर्थाः नाम गृहीताः प्रकाशकाः ।।
तस्य प्राणे च या शक्तिः या च बुद्धौ व्यवस्थिता ।
विवर्तमानास्थानेषु सैषा भेदं प्रपद्यते।।

एवमेव शक्तिनां वर्णने त्रयाणां शक्तीनां वर्णनं प्रतिपादितं तद्यथा–

1) अभिधा शक्तिः 2) लक्षणा शक्तिः

3) व्यञ्जनाशक्तिश्च

अत्र एतासां शक्तीनां संक्षेपरूपेण लक्षणं प्रतिपाद्यते यथा –

1) अभिधा शक्तिः – तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा।

2) लक्षणाशक्ति :–

मुख्यार्थबाधे तद्योगेरूढ़ितोऽर्थः प्रयोजनात् ।

अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ।।

3) व्यञ्जनाशक्तिः –

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।

सा वृत्तिव्यञ्जना नाम शब्दस्यार्थादिकस्य च ।।

पुनश्च व्यजनायाः द्विधा विभागः कृतः आचार्यमम्मटेन । तद्यथा – 1) अभिधा मूलाव्यञ्जना 2) लक्षणामूला व्यञ्जना च।

क्रमेऽस्मिन् पुनः लक्षणायाः षड्भेदाः प्रदर्शिताः । तद्यथा –

1) सरोपा उपादानलक्षणा – (कुन्ताः पुरुषाः प्रविशन्ति)।
2) साध्यवसाना उपादन लक्षणा (कुन्ताः प्रविसन्ति)।
3) सरोपालक्षणलक्षणा – (आयुर्धृतम्)।
4) साध्यवसानालक्षण–लक्षणा (आयुरेवेदम्)।
5) सरोपा गौणीलक्षणा (गौर्वाहीकः)।
6) साध्यवसाना गौणी लक्षणा (गौरेयम)।

क्रमेऽस्मिन् आचार्यमम्मटेन रस्यापि चर्चा विहिता । रसवादीकवयः आचार्याः रसं काव्यस्य आत्मा इति स्वीकुर्वन्ति। वैदिकश्रुतिः रसो वै सः इत्यस्याधारेण रसमानन्दस्वरूपमेवाङ्गी कुर्वन्ति। भारतीय समीक्षाशास्त्रे रसस्यालोचनायाः मानदण्डं स्वीकुर्वन्ति। नूनमेव रसस्य महिमा बहुव्यापकं वर्तते। मानवमात्रस्य जीवनं रसाय वर्तते। अयं निर्विवाद सत्यं यत् रसजीवनमावश्यकतत्वं वर्तते। सम्भवतः रसस्य एतां महत्तां लक्ष्यीकृत्यैव भरतमुनिना लिखितं यथा न हि रसादृते ते कश्चिदर्थः प्रवर्तते। अतः समयाऽभावकारणात् मया निष्कर्षरूपेण प्रतिपाद्यते यत् साहित्यशास्त्र परम्परायां आचार्यमम्मटस्य महतीयोग दानं परिलक्ष्यते। अयं महोदयाः स्वस्य एकेनैव ग्रन्थेन सम्पूर्णसाहित्यशास्त्रे भारते एव न, अपितु विश्वे मूर्धन्यस्थाने प्रतिष्ठिताः सन्ति।

काव्य-स्वरूपनिरूपणे कश्मीरवासिनः मम्टाचार्यस्य योगदानम्

सुशान्तशर्मा
साहित्याचार्यः श्री रणवीर परिसर
कोट–भलवाल, जम्मू

चिरपरम्परावाहिनी काव्यसंसारे लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्। अत्रैतादृश्यस्य काव्यस्य किं स्वरूपमिति स्वाभाविकी जिज्ञासा समुप्पद्यते। काव्यशास्त्रे मुख्यत्वेन आचार्य मम्मटस्य काव्यलक्षणं स्वीक्रियते यतोहि लक्षणमेतत् काव्यस्य स्वरूपं सर्वाङ्गत्वेन व्यवस्थापयति। अतएव काव्यशास्त्रज्ञै लक्षणमेतद् बाहुलयेन स्वीक्रियते। मम्मटपूर्ववर्तिनः काव्यशास्त्रिणः भामह–रूद्रट–राजशेखर–कुन्तकप्रभृतयः सहितौ शब्दार्थो काव्यमिति सामान्येन काव्यस्वरूपं लक्षितपन्तः । अलङ्कारवाद प्रवर्तक भामाचार्येण निरूपितम् –

शब्दार्थौ सहितौ काव्यम् इति।

लक्षणमेतत् तु सामान्यजातीय केवलं स्वरूपाधायकश्च, न च कमप्युत्कर्षधायकम्। समालोचस्त्वत्र स्वरूपाधायकमपि लक्षणं न स्पृशान्ति। भामहस्य काव्य–परिभाषा तु काव्येन साकं शास्त्रं भूगोलमितिहासं मौखिकवार्तालापमपि स्पृशति। अतोऽनया काव्याकाव्यनिर्णयो दूरमपेतः।

दण्डिनोऽपि काव्यादर्थे ऽष्टार्थव्यवच्छिन्ना पदावलिः काव्यम्। अस्यां परिभाषयामिष्टपद प्रयोग एव भामहलक्षणात् विशिष्टः । मुख्यतः परिभाषेयं भामहस्य व्याख्यानभूतमेव । अनेन सिंहमेतत् यत् भामहवामनरुद्रटादीनां दृष्टि शब्दार्थयोः उपरि एव स्थिता आसीत्।

तदनन्तरं ध्वनिवादी आचार्यैः काव्यस्यात्मा ध्वनिः एवं सहृदयहृदयाह्वादि शब्दार्थमयत्वमेव काव्यलक्षणम् इति निरूपितम्। एवं च पदादेरारभ्य रसपर्यन्तम् औपित्यानौचित्य चर्चा सोदाहरणं त्रसारयन् क्षेमेन्द्रः औचित्यमेव काव्यजीवितं साररूपे। निर्धारितवान्। उक्तञ्च तेन

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः तदा ।
औचित्यं रसासिद्धस्य स्थिरं काव्यस्य जीवितम्।।

एवं मम्मटपूर्वकाव्यशास्त्रिणः भामहादयः सहितौ शब्दार्थौ काव्यमिति काव्यलक्षणं कृतवन्तः । एतत् काव्यस्य वाह्य स्वरूपम्। मम्मटादर्शभूत आचार्य आनन्दवर्धनः काव्यस्यात्मा ध्वनिरिति उक्तवान् । एतत् काव्यस्य आभ्यन्तरस्वस्तम्। विश्वस्य साहित्यिकपदकोषस्य (Dictonary of World literary terms) द्वानवतितमे पृष्ठे शिप्ले (Shipley) महोदयो लिखति यत्परिभाषा कस्याऽपि शब्दस्योचितं स्पष्टं निश्चितं पूर्णं निर्धारणं भवति, किन्त्वेतादृशी परिभाषा काव्यस्याद्यावधि नोपलब्धां प्राचीनकालादद्यावधि साहित्यधुरन्धरैः काव्यपरिभाषाः कृताः किन्तु न ताः सर्वागतः शुद्धा । मम्मटं विहाय प्राये। सर्वेऽपि काव्यलक्षणकाराः काव्यस्य यद् यत् स्वरूपं प्रोचुस्तत्र सर्वत्र अभाव दरीदृश्यते एव। किमपि लक्षणं त्वेवं विधं यत्र काव्यस्रू स्वरूपं स्पष्टं भवत्येव नं । किप्येतादृशं यत्र सामान्य काव्यस्य कृते स्थानमेव न वर्तते। किमपि लक्षणमेवं विधं यत्र कान्यत्वागोऽपि न सलक्ष्यते । एतादृशी परिस्थितौ।

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

मम्मटस्यैवविधं काव्यलक्षणमेव वस्तुतः काव्यस्य यथार्थ स्वरूपं प्रस्तौति।

अदोषौ शब्दार्थौ काव्यम् –

सदोषावपि शब्दार्थौ काव्यं न भवेदिति वारणाय काव्यलक्षणे विशेषणम् अदोषाविति। एवं काव्यत्वविघटका ये प्रबलदाषाः च्युतसंस्कारादयः तद्रहितौ शब्दार्थौ काव्यमिति। इदानीम् अदोषौ शब्दार्थौ काव्यमित्यत्रापि विश्रतिपलि जायते। यतोहि दोषरहितं काव्यं दुर्लभम् तदा तु सर्वथा दोषरहितस्य काव्यस्य निर्विषयत्। अल्पविषयता वा स्यात्। तर्हि अदौषौ इत्यनेन मम्मटस्य कोऽभिप्राय शतै प्रश्नः समुदेति किम् काव्यस्य निर्विषयता अल्पविषयत्यया भयात दोषाभावस्य चचर्वै न करणीया। यया कीटादिविद्धं रत्नमपि रत्नमेव भवति केवलं तस्य मूल्ये न्यूनता । जायते, न तु रत्नत्वाभाव, तथा दोषसहितस्यापि काव्यस्य काव्यत्वं स्यादेव, यदि तत्र सरसतां भवेत्।

परमेवं न वक्तव्यम् काणत्वस्वञ्रनजत्वादिरूपे अङ्गवेकल्ये सत्यपि नहि गनुजस्य मनुजत्वाभावः तत्र चैतन्यसद्भावातृ तथापि अपेक्ष । भवति यत् किमपि अङ्गवैकल्यं न स्यात् सुरूपता भवेदेव । एवमत्र काव्यस्वरूपत्वेन

अभिमतयोः शब्दार्थयोः अदोषता अपेक्ष्यते। दोषः कदापि स्वीकार्यो नहि भवति।

उद्देश्यप्रतीतिप्रतिबन्धकत्वम् दोषत्वं वस्तुतः वर्तते। काव्यस्य मुख्यम् उद्देश्यं प्रयोजनप्रकरणे मम्मटेनैव उक्तम् सफलप्रयोजनमौलिभूतं रसास्वादनम्। अतएव मुख्यार्थः मुख्यप्रयोजनं रसास्वादनं कथ्यते .... मुख्यार्थहति, दोष इति दोषसामान्यलक्षणम्। एवं परमार्थतः मुख्यार्यरसापकर्षणरहितौ शब्दार्थौ काव्यमिति ।

सगुणौ शब्दार्थौ काव्यम् –

निगुणौ शब्दार्थौ न काव्यं भवेदिति पारणाय शब्दार्थयोः सगुणत्वविशेषणमृ। माधुर्य–ओच प्रसादश्च इति काव्ययया: गुणाः । तत्सहितौ शब्दार्थौ काव्यस्वरूपत्वेन अभिमतौ। यथा दोषाभावता तथैव गुणसद्भावना अपेक्ष्यते। किन्त्वत्रापि एकं विप्रतिपतिः संजायते यत् गुणा रसधर्माः यथा आत्मधर्माः शौर्यादयः तर्हि कथं शब्दार्थविशेषणं सगुणविति वाच्यम् परं यथा लोके आत्मनि सति शैय्यदिः अभिव्यक्तिस्तु अङ्गद्वार एव जायते तथैव काव्यात्मभूते रसे माधुर्यादिगुणानां वर्णश्चनावृत्तिभिः अभिव्यञ्जनं भवति। एवं गुणानां रसेकनिष्ठत्वेऽपि परम्परय । तदभिष्यञ्जकशब्दार्थनिष्ठत्वं कथ्यते ।

सालङ्कारौ शब्दार्थौ काव्यम् –

यथा दोषाभावः तु सर्वेषां मतम्। एवं च वामनादिभिः गुणपक्षपातः कृतः। यतोहि रीतिः गुणाभिव्यञ्जिका भवति। अतः मम्मटाचार्यैः । काव्यलक्षणे काव्यस्वरूपेण अभिमतयोः शब्दार्थयोः अदोषत्वं सग्रणत्वं च विशेषणं दत्व। सम्प्रति पूर्वाचार्यैः समन्वयः संस्थापितः। यतोहि मम्मटाचार्य समन्वयवादी काव्यशास्त्री अस्ति वर्तते। एवं च निरलङ्कारे शब्दार्थयुगले काव्यत्वप्रसन्तिः न स्यादतः सालङ्कारौ शब्दार्थौ काव्यमिति हृदा मन्वानोऽपि साक्षात्पदेन तथा न उक्तवान् मम्मटाचार्यः । यथा लोके आभूषणरहितस्य निर्धनस्य मनुजयापि मनुजत्वं स्वीक्रियते एव तथा वृतौ काव्यप्रकागकारेण निर्धनस्य मनुजस्यापि मनुजत्वं स्वीक्रियते एव तथा वृत्तौ काव्यप्रकागंकारेण उक्तम्–सर्वत्र सालङ्कारौ शब्दार्थौ एव काव्यमिति। काव्यलक्षणे शब्दाथर्यो सालङ्कारत्वविशेषणं न दत्तम् अपितु अलङ्कारः विकलपपक्षे स्थापितः यतोहि लोकवत् स्फुटसालङ्कारतास्थितिः काव्ये नहि अनिवार्या करणीया इति मम्मटाभिप्रायः ।

क्वापि अनलङ्कारत्वे अपि शब्दार्थौ काव्यम् –

इदानीम् [illegible] प्रश्नोऽयं समुदेति यत् मम्मटेन स्वकाव्यलक्षणे काव्यस्वरूपभूतयोः शब्दार्थयोः सालङ्कारत्वम् अथवा निरलङ्कारत्वं विशेषणं [illegible] न कृतम् अपितु अलङ्कारस्य विकल्पस्थिति निहिता अलङ्कृतिः [illegible]। एवं न दोषवत् निषेधः कृतः न गुणवत् विधानं कृतम् यथापि अलङ्कारवादिनामिव मम्मटोऽपि अलङ्कारोपेक्षां करोति, किन्तु [illegible] निवेशो तथा नास्ति। यतोहि मुख्यत्वेन आचार्यः ध्वनिपक्षपाती [illegible] सहृदयस्य काव्यात्मभूतस्य अर्थस्य द्वैविध्ये वाच्यापेक्षया [illegible] प्रकाशितं ध्वनिकारै । मम्मटादर्शभूतेन आचार्ये। [illegible]। अतः यत्र काव्ये प्रतीममानार्थः प्रधानत्वेन प्रकाश्यमानो [illegible] यदि शब्दस्य उत्कर्षाधायकत्वं अलङ्करण तथा स्फुटं न स्यात् [illegible] स्वीकरणीयमेव सहृदयश्लाहतायाः उत्कृष्टस्थितिसच्वात्। [illegible] शब्दार्थयुगलस्य काव्यस्य उदाहरणम् –

[illegible] अनलङ्कृती–स्फुटालङ्कारग्रन्थौ अपि शब्दार्थौ काव्यमिति [illegible] दृढतायै काव्यप्रकाशकारः नहि स्वस्य एव अपि सहृदयसमाजादृतम् सुप्रसिद्धं परकीयं प्रशस्तमुदाहरणं प्रस्तौति – तद्यथा –

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा–
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ।
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।।

इत्यादौ पद्ये शब्दार्थयोः स्फुटालङ्कारविरहेऽपि रसाभिव्यक्तेः प्राधान्यात् नहि केवलं काव्यसामान्यता अपितु काव्यविशेषता उत्तमकाव्यता एवं मम्मटाचार्यः समन्वयवादी काव्यशास्त्री वर्तते। स निरर्गलं परमतं नहि दूषयति। सूत्ररूपेण स्वप्रतिपाद्यविषयं प्रकाशयति, अतः सर्वेषां पूवाचार्याणां मतं समीक्ष्य मम्मटाचार्यः वेदादिशास्त्रोपदेशसमालं विधिनिषेधविकल्पात्वमकं सर्वविलक्षणं स्वकीयं काव्यस्वरूपं प्रकाशितमान्। मम्मटार्यस्यापि काव्यलक्षणे कतिचित्पूर्वाचार्यलक्षणसमानं विशेष्यपदं शब्दार्थो एव विद्यते। यथा मम्मटेन भोजराजकाव्यलक्षणानुगुणं दोषाभाव गुणसद्भावश्च स्वीकृतः परम् अलङ्कारविषये मम्मटेन सर्वविलक्षणश्चः प्रकाशितः । इदमेव मम्मटकाव्यलक्षणस्य वशिष्टयमस्ति। अतः एव मम्मटकृतकाव्यलक्षणं साहित्यसमाजे सर्वाधिकतया समादृतः ।

अलङ्कारशास्त्रसम्प्रदायानां परिधौ काश्मीरविदुषां योगदानम्

सुरेशस्वामी
शोधच्छात्र
राष्ट्रिय संसकृत संस्थान
श्री रणवीर परिसर, कोट–भलवाल, जम्मू

भरतमुनेः नाट्यशास्त्रात् महर्षिव्यासस्य अग्निपुराणात् च आरभ्य: भामहः, वामनः, भट्टोद्भटः, रुद्रटः, भट्टनायकः, मुकुलभट्टः, आनन्दवर्धनः, वाग्भटः, रुय्यकः, मम्मटः, लोल्लटः, इत्यादीनाः काश्मीरविदुषां योगदानं अलङ्कारशास्त्रसम्प्रदायानां विकासः अद्वितीयः वर्तते। सम्प्रदायानां विभाजने अपि एतेषां आचार्याणां महति भूमिका परिलक्ष्यते। ते सम्प्रदायाः School of kavyasastra उच्यन्ते। एतत् विभाजन काव्यस्यात्माधारितो वर्तते।

अलङ्कारशास्त्रसम्प्रदायानां स्थापना काव्यात्मभूत तत्वानामाधारिता अस्ति। अतः प्राचीनकालात् काव्यस्यात्माविषये बहवः सम्प्रदायाः क्रमेण दृष्यन्ते। अलङ्कारशास्त्रग्रन्थेषु विद्यमानबहवः सम्प्रदायाः बहूनि उद्देश्यानि प्रतिपादयन्ति। अलङ्कारशास्त्रसम्प्रदायानां विभाजनं स्थूलतः सूक्ष्मं प्रति शिक्षणसिद्धान्तोऽपरि आधारितोऽस्ति। अलङ्कारशास्त्रपरम्परायां षड् सम्प्रदायाः ख्याति प्राप्ताः सन्ति। तान् क्रमेण अत्र मया प्रस्तुयते।

1– रससम्प्रदायः– भरतमुनिर्महर्षिव्यासश्च ।
2– अलङ्कारसम्प्रदायः– भामहः, रुद्रट इत्यादयः।
3– रीतिसम्प्रदायः– वामनः।
4– वक्रोक्तिसम्प्रदायः– आचार्यकुन्तकः।
5– ध्वनिसम्प्रदायः– अनन्दवर्धनः।
6– औचित्यसम्प्रदायः– क्षेमेन्द्रः।

1– रससम्प्रदायः–

षट्सम्प्रदायेषु रससम्प्रदायः सर्वाधिकप्राचीनतमः वर्तते। यद्यपि राजशेखरेण रससमप्रदायस्य संस्थापकः भरतमुनिं मन्यते। यद्यपि राजशेखरेण स्वकाव्मीमांसायां नन्दकेश्वरं रससम्प्रदायस्य प्रर्वतको स्वीक्रियते। परं नन्दिकेश्वरविरचितं ग्रन्थः कुत्राऽपि न उपनलभ्यते। अतः रससम्प्रदायस्य

पितामहः भरतमुनिः एव स्वीक्रियते। रसविवेचनं सर्वप्रथमं नाट्यशास्त्रे एव उपलभ्यते। तदर्थं भरतमुनिना उक्तम्—

विभावानुभावव्यभिचारिसंयोगाद्भसनिष्पत्तिः।

उत्तरवर्तिनः आचार्याः तु केवलं तेषां रसविवेचनाधारितं रसविवेचनं प्रस्तुवन्ति। भरतमुनेः नाट्यशास्त्रस्य षष्ठे अध्याये रसानां, सप्तमे अध्याये च भावनां विवेचनं विस्तारेण उपलभ्यते। भरतमुनेः रससिद्धान्तस्य व्याख्याकारः भट्टनायकः, भट्टलोल्लटः, शङ्कुकः, अभिनवगुप्तादयः काश्मीरविद्वान्सः सन्ति। एतेषां आचार्याणां मतानां चर्चा काव्यप्रकाशे आचार्यमम्मटेन विस्तारतया कृतम्।

भट्टलोल्लटः, शाङ्कुकः, भट्टनायकः, इत्यादयः टीकाकाराणां योगदानं रससम्प्रदायस्य संवद्धने महत्वपूर्णमस्ति।

1— भट्टलोल्लटः—

आचार्यमम्मटस्य काव्यप्रकाशेन[1] हेमचन्द्रस्य काव्यानुशासनेन[2] मल्लिनाथस्य तरलया[3] गोविन्दस्य च काव्यप्रदीपेन[4] जायते यत् भट्टलोल्लटः भरतमुनेः टीकाकारः आसीत्। भट्टलोल्लटः उत्पत्तिवादस्य संस्थापकाचार्यः आसीत्। तेषां मतानुसारेण तमे विद्यमान रज्जु भमवशात् सर्पस्य भ्रमं उत्पादयति। तेनैव भयकम्पनस्वेदादयः विकाराः उत्पद्यन्ते। तथैव रामस्यानुकर्त्ता नटं दृष्ट्वा रामस्य भान्ति भवति येन च श्रृङ्गारादयः रसानां उत्पत्तिः भवन्ति।

2— भट्टशंकुकः—

न्यायशास्त्रावलम्बी आचार्यः शक्कुकः अनुमितिवादस्य प्रतिपादकोऽस्ति। तेन रसं अनुमानस्य विषयरूपे प्रतिपादितम्। तेषां मतानुसारेण लोके नायिकानायकयोः। परस्परं स्नेह दृष्ट्वा निपुणजनाः अनुमानेन रसस्य अनुमानं करोति।

3— भट्टनायकः—

आचार्यभट्टनायकः, भुक्तिवादस्य प्रर्वतकोऽस्ति। तेषां मतानुसारेण काव्येषु व्यापारस्य प्रधानता भवति। इयं व्यापारः त्रिधा भवति। 1—अभिधा, 2—भावकत्वम्, 3— भोजकत्वञ्च।

4— अभिनवगुप्तः —

अभिव्यक्तिवादस्य संस्थापकाचार्यः अभिनवगुप्तः व्यञ्जनावादी

आसीत्। तेषां मतानुसारेण साधारणव्यञ्जाव्यापारेण सहृदयेषु विद्यमान् स्थायीभावानां निष्पत्तिः रसरूपे भवति।

रससंख्याः –

भरतमुनेः मतानुसारं रस अष्टधा वर्तन्ते[5]। केचन् आचार्याः शान्तमपि नवमं रसं स्वीकुर्वन्ति। परं भरतमुनि शान्तं रसं न स्वीकरोति। यथा उक्तम्–

शममपि केचित् प्राहुः पुष्टिर्नाट्ययेषु नैतस्य [6]।

रुद्रटेन "प्रेयान" नामकं दशमं रसमपि अङ्गीकृतम्[7]। आचार्यभोजराजेन तु श्रृंगारसं आदिमरसत्वेन स्वीकृतम्।

श्रृंगारवीरवीरकरूणाद्भूतरौद्रहास्य,
बीभत्सवत्सलभयानक शान्तनाम्नः।
आम्नासिषुदश रसान् सुधियो वयं तुः
श्रृंगारमेव रसनाद् रसमामनामः[8]।।

आचार्यविश्वनाथेन तु रसं काव्यस्य मूलतत्वरूपे स्वीकृतम्। विश्वनाथेन उक्तम् "वाक्यं रसात्मकं काव्यम्[9]।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् रसक्षेत्रे काश्मीरविदुषां योगदानाम् अद्वितीयमस्ति। वस्तुतः विश्वनाथप्रभृतिः आचार्यः रससिद्धान्तस्य व्याख्या कृता। परं भरतपरवरवर्ती काश्मीराचार्याणां विशिष्टमहत्त्वं रसनिष्पादने दृश्यते। भट्टलोल्लटः, शंकुकः, भट्टनायकः, अभिनवगुप्तादयः आचार्याः रसस्य यादृशः शास्त्रीयमनोवैज्ञानिकञ्च अध्ययनं कृतम् तादृशः अन्यत्र तु दुर्लभमेव।

2– अलङ्कारसम्प्रदायः–

अलंकरोतीति अलंकारः, अलंक्रियतेऽनेनेति वा अलङ्कार। अलं कृ धातोः ध ञ प्रत्ययेन निष्पन्नोऽयं अलङ्कारशब्दः। लेटिनभाषायां अलङ्कारस्य अर्थः "स्वर्ण" इति विद्यते। अलङ्कारः काव्यस्य महत्त्वपूर्णमङगं वर्तते। काव्य–सौन्दर्यस्य विधायकानां सम्पूर्ण तत्त्वानां विवेचनशास्त्रमेव अलङ्कारशास्त्रम्।

काव्यशास्त्रपरम्परायां अलंकारसम्प्रदायस्य महन्महत्त्वम्। अलंकारिकभामहः अलङ्कारसम्प्रदायस्य संस्थापकोऽस्ति। अस्य पोषणकर्त्ता आचार्यः उद्भट्टः दृश्यते। अस्य सिद्धान्तस्य पुनः अनुसरणं दण्डी रुद्रटः

प्रतिहारेन्दुराजः मम्मटः इत्यादि आचार्यैः कृतम्। एतेषां मतानुसारेण अलङ्कारा एव काव्यस्यात्मा । प्राणभूता वा भवन्ति। यथा अग्नौ उष्णता भवति तथैव अलङ्काराः काव्यस्य प्राणभूता भवन्ति । तदर्थं जयदेवेन उक्तम्–

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती[10]।।

अलङ्कारतत्त्वज्ञ आचार्यो दण्डी काव्यादर्शे अलङ्कारं लक्षयति –

काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते[11]।।

आचार्यवामनः अलङ्कारं "सौन्दर्यमलंकारः" इति अभिदधत् काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन परिगृहणाति। मम्मटोऽलंकारं लक्षयति–

उपकुर्वन्ति तं सन्तं येऽङ्कद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः [12]।।

अलङ्कारा अङ्गदादिवत् शब्दर्थयोः शोभावर्धकाः, रसादीनां चोपकर्त्तारः। अतएवैते अस्थिरा धर्मा उच्यन्ते।

अलङ्काराणां विकासः–

अलङ्काराणां सर्वप्रथमम् उल्लेखो भरतकृते नाट्यशास्त्रे प्राप्यते। तत्र यमक–उपमा–रूपकः– दीपकानीति चत्वारोऽङ्काराः निर्दिश्यन्ते। यथा–

नाट्यशास्त्रे उक्तम्–

उपमारूपके चैव दीपकं यमकं तथा।
अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः [13]।।

अग्निपुराणे 15 अलङ्काराः, वामनकृते काव्यालंकारसूत्रे 33 अलंकाराः दण्डीकृते काव्यादर्शे 35 अलंकाराः, भामहकृते काव्यलंकार 39 अलंकाराः, उद्भटकृते काव्यालंकारसारसंग्रहे 41 अलंकाराः, रुद्रटकृते काव्यालंकारे 52 अलंकाराः, मम्मटकृतकाव्यप्रकाशे 67 अलंकाराः, विश्वनाथकृते साहित्यदर्पी 84 अलंकाराः, जयदेवकृते चन्द्रालोके 100 अलंकाराः, अप्पयदीक्षितकृते कुवलयनन्दे 124 अलंकाराः , पण्डितराज जगन्नाथकृते रसगङ्गाधरे 180 अलंकाराः विविच्यन्ते।

परिणामतः विवेचयामः चेत् भामहः, रुद्रटः, दण्डि इत्यादयः

काश्मीरविदुषा अलंकारसम्प्रदायस्य विकासे योगदानं अद्यवधि अद्वितीयमस्ति।

3– रीतिसम्प्रदायः–

कालक्रमेण अलंकारसम्प्रदायस्यान्तरं रीतिसम्प्रदायस्य उत्तपत्तिः अभवत्। रीतिसम्प्रदायस्य प्रधानप्रतिपादकः आचार्यः वामन अस्ति। तेषां ग्रन्थे रीतिप्रतिपादनं सम्यकत्या दृश्यते । तेन रीतिसम्प्रदायस्य प्रचार प्रसारः कृतम्।

"रीतिरात्मा काव्यस्य"।

रीतिसम्प्रदाय गुणसम्प्रदायनाम्नाऽपि व्यवह्रयते। तदर्थमुक्तम् वामनेन –

"विशिष्टा पदरचना रीति, विशेषो गुणात्मा" ।

भरतमुनिः सर्वप्रथमं नाट्यशास्त्र दशकाव्यार्थगुणानां वर्णनं करोति –

श्लेषः प्रसादः समता समाधिः माधुर्जभोज पदसौकुमार्यम्।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दर्शते[14]।।

आचार्यवामनः रीति त्रिधा विभज्यतै 1–वैदर्भी, 2–गौड़ी, 3–पांचाली च । वैदर्भीरिते दशगुणानां समावेशः भवति। गौड़ीरीते ओजगुणः, पाञ्चालीरीते च माधुर्यसौकुमार्यष्च गुणानां सत्ता विद्यते । राजशेखरेण कर्पूरमञ्जरी इति ग्रन्थे मङ्गलाचरणे वच्छोभी, मागधी पांचाली इत्यादयः रीतिनां उल्लेखः कृतम्। आचार्यरुद्रट्टेन लाटीरीतेः, प्रतिपादनं कृत्वा रीतिनां संख्या चतस्त्रः कृतम्। आचार्यभोजः आवन्ती मागधी लाटी इत्यादयः नवीन रीतिनां संवर्द्धनं कृत्वा षड् रीतयः निर्मिता।

इत्थं रीतिसम्प्रदायस्य विकासे काश्मीरविदुषां योगदानं महत्वपूर्णञ्च वर्तते। येन अलंकारशास्त्रं अपूर्ववृद्धिं प्राप्तम्।

4– वक्रोक्तिः सम्प्रदायः–

वक्रोक्तिसंप्रदास्योद्भवो ध्वनिसम्प्रदायकमूलक एव। आनन्दवर्धनाचार्यप्रतिपादितेन ध्वनिसिद्धान्तेन नैराश्यम् आप्ता अलंकारवादिनः अलंकारेषु काव्यस्य मूलतत्वम् अन्वेषयन्तो वक्रोक्तिं समासादयन्। सम्प्रदायस्य प्रतिष्ठापक कुन्तकाचार्यः। तद्विरचितं वक्रोक्तिजीवितं विषयऽस्मिन् प्रमाणिको ग्रन्थः।

वक्रोक्तिसम्प्रदायस्यास्य उद्भवः आचार्यभामहेन प्रारभते। स अ चालंकारे समग्रमपि काव्यवैशिष्टयं संगृहणाति । सर्वत्रापि अतिशयोक्तेः

प्राधान्यं निरीक्ष्यते। वक्रौतौ अपि अतिशयोक्तैरनिवार्यत्वम् । तदर्थमुकतम्-

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्रोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना[15]।।

आचार्यः दण्डी काव्यं द्विधा विभजति–स्वभावोक्तिः वक्रोक्तिश्च।

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
द्विधा भिन्नं स्वभावोक्ति र्वक्रोक्तिश्चेति वाङ्मयम्[16]।।

आनन्दवर्धनोऽपि वक्रोक्तिं समर्थयन् इव प्रतिभाति तन्मतानुसारं काव्यस्यात्मा ध्वनि। काव्यस्य कला–भाव–पक्षयोर्ध्वनिना सम्पाद्यते। वक्रोक्तिः काव्यस्य सौन्दर्यं विशदयति। कुन्तकसमकालीनो भोजराजोऽप वक्रोक्तिं उपास्ते। वक्रोक्तिमूलकं काव्यलक्षणम् उपपादयता तेनोच्यते–

यद् वक्रं वचः शास्त्रे लोके च वच एव तत्।
वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृति[17]।।

भोजराजेन सरस्वतीकण्ठाभरणे वाङ्मयं त्रिधां विभजति–वक्रोक्तिः, रसोक्ति–स्वभावोक्तिश्च। आचार्यकुन्तकेन वक्रोक्तेः स्वरूपं प्रतिपादयन् आह–

उभावेतावङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरूच्यते[18]।।

वक्रोक्तिर्वचोभङ्गिमा एव। एष वर्चाभङ्गिमा एव उक्तौ शोभाम् आदधाति। उक्तौ चमत्कृतेचारूतायाश्च संपादनं वक्रोक्तेरेव सम्भाव्यते। अतः वक्रोक्तिः काव्यजीवितम्। तदर्थं कुन्तकेन काव्यलक्षणं प्रतिपादितम्–

शब्दार्थो सहितौ वक्र–कविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाहलादकारिणि[19]।।

आचार्यकुन्तको वक्रोक्तिं षोढा विभजति –

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः।।
वाक्यस्य वक्रभावोऽनयो भिद्यते सः सहस्रधा।
यत्रालङ्कारवर्गीऽसौ सर्वोऽप्यन्तर्भविष्यति।।
वक्रभावः प्रकरणे बन्धेवाऽस्ति यादृशः।
उच्यते सहजाहार्य–सौकुमार्य मनोहरः[20]।।

उपर्युक्त विवेचनेन स्पष्टं भवति यत् वक्रोक्तिसम्प्रदायः काव्यालंकारशास्त्रस्य

प्रमुखो सम्प्रदायोऽस्ति। वक्रोक्तिसम्प्रदायस्य विकासे भामह–दण्डी–कुन्तकादयः काश्मीराचार्याणां योगदानं अद्वितीयं वर्तते।

5– ध्वनिसम्प्रदायः–

वाच्यार्थपेक्षया व्यङ्ग्येऽर्थे मुख्ये सति ध्वनिरिति कथ्यते। तथाविधं च काव्यं सर्वोत्कृष्टं मन्यते।

"इदमुत्तममतिशायिनि व्यङ्गये वाच्याद् ध्वनिर्बैधैः कथितः[21]।

आचार्य विश्वनाथेन अपि उक्तम्–

"वाच्यातिशयिनि व्यङ्गये ध्वनिस्तत्काव्यमित्तमम्[22]।।

आनन्दवर्धनाचार्यो ध्वनिं लक्षयति–

यत्रार्थः शब्दो वो तमर्थमुपसर्जनोकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[23]।।

वाच्यर्थातिरिक्तः को ध्वनिः व्यङ्ग्योऽर्थो वेति जिज्ञासायां ध्वनिकारेण स्फुटीक्रियते यत् कामिनिलाविण्यमिव यत् प्रसिद्धातिरिक्तम् अप्यदेव किंचित् प्रतीयते वाच्यातिरिक्तं व्यङ्गयरूपं स ध्वनिः।

प्रतीयमानं पुररन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत् तत् प्रसिद्धावयवार्तिरिक्तं विमाति लावण्यमिवाङ्गनासु[24]।।

इयं भङ्गयार्थबोधनक्षमतैव प्रतिभावैशिष्ट्येन महाकवीनां यशः प्रसारयति। व्यङ्गयार्थाभिव्यक्तिरेव महाकवित्वस्य निकषः। अतो ध्वनिकृतोच्यते–

सरस्वती स्वादु तदर्थवस्तु निष्यन्दयाना महतां कवीनाम्।
अलोकसामान्यभिव्यक्ति परिस्फुरन्तं प्रतिभा–विशेषम्[25]।।

ध्वनिकारः ध्वनिं त्रिधा विभजति–

1–रसध्वनिः,2–अलंकारध्वनि', 3–वस्तुध्वनिश्च।

6– औचित्यसम्प्रदायः–

औचित्यसम्प्रदायस्य प्रवर्तकः आचार्यः क्षेमेन्द्रः अस्ति। तेन स्वग्रन्थे औचित्यविचारर्चायां औचित्यं काव्यस्यात्मा प्रतिपादितम्।

अनौचित्याद्दते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिवन्धस्तु रसस्योपनिपत्परा।।

उचितभावस्य प्रतिपादनं औचित्यम्। यथा–

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।

क्षेमेन्द्रस्य मतानुसारेण औचित्यं विना अलंङ्कारगुणौः काव्ये रूचिं उत्पादयतः।

निष्कर्षरूपेण वदामः चेत् अलंकारशास्त्रसम्प्रदायानां विका काश्मीरविदुषां योगदानम् अद्वितीय महत्वपूर्णञ्च वर्तते । तेषां योगदाने अलंकारशास्त्रसम्प्रदायाः फलीभूता भवन्ति। एतेषां योगदानं अलंकारशास्त्र सम्प्रदायेभ्यः विस्मारयितुं न शक्यते।

1– काव्यप्रकाशः 4/5

2– काव्यानुशासनम्, पृ.67, टीका पृ.215

3– तरला पृ.85–88

4– काव्यप्रदीपः 4/5

5– नाट्यशास्त्रम् 6/15

6– दशरूपकम् 4/35

7– काव्यलंकार 12/3

8– श्रृंगारप्रकाशःप्रथमप्रकाशः

9– साहित्यदर्प 1/3

10– चन्द्रालोकः 1/8

11– काव्यादर्शः 2/1

12– काव्यप्रकाशः 8/67

13– नाट्यशास्त्रम् 1/7/43

14– नाट्यशास्त्रम् 16/92

15– काव्यलंकार 2/85

16– काव्यलंकार

17– श्रृंगारप्रकाशः

18– वक्रोक्तिजीवितम् 1/10

19– वक्रोक्तिजीवितम् 1/7

20– वक्रोक्तिजीवितम् 1/19,20,21

21– काव्यप्रकाशः 1रु4

22– सा.दर्पणः 4/1

23– ध्वन्यालोकः 1/13

24– ध्वन्यालोकः 1/4

25– ध्वन्यालोकः 1/6

भारतीयनाट्यकलायां गीतवाद्यनृत्तानि

प्रमोदशुक्लः
शोधच्छात्र
राष्ट्रिय संस्कृत संस्थान,
जयपुर परिसर

शारदादेशेत्यपरनाम्ना हि काश्मीराधरा सुविख्याता । सरस्वत्याः जन्मभूमिरियं विद्वद्भिः सम्मता । कथ्यते यत् सा कवेर्भारती काश्मीरभूमौ मम्मणस्वरुपेणाऽवातरत्। साहित्यशास्त्रस्य तु विकासो जानश्चनया काश्मीरश्चरया। साहित्यशास्त्रस्य अथवा काव्यशास्त्रस्य यः विश्वकोषोऽस्ति तन्नाम भरतनाट्यशास्त्रम्। अनेन बिना भारते विविधकलानां कल्पनैव न समभवति। नाट्यशास्त्रें न केवलं नाट्यकलायाः अपितु साहित्यसङ्गीतादिविविधनलितकलानामाकरग्रन्थोऽस्ति।

नाट्यशास्त्रस्य मूलसंस्करणानां टीकानाञ्चाधिकांशाः काश्मीरिकोऽभिनवगुप्तोऽभिनवभारतत्याऽऽलोकेनालोकयत्काव्यलोकम्। काश्मीरप्रदेशो हि भारतदेशस्य स्वर्गः कथ्यते। महान् भारतीयचलचित्रकारः "किंग ऑफ रोमांस" इत्यभिधानेनाधीतः स्वर्गीय यशचोपड़ामहोदयः, तस्मै तु काश्मीरनगरमति रोचते स्म। तत्रव्यदृश्यानि प्रायः तस्य प्रत्येकं चलचित्रेषु द्रष्टुं शक्यन्ते। अद्य तु अस्माकं सभ्यता एकविंशतिशताब्धाः द्वारं प्रविष्टा वर्तते, यन्त्रविज्ञानमतिवेगेन वर्द्धितम्। चलचित्रम् दूरदर्शनम्, आकाशवाणी, चलाचलसङ्गणकयन्त्रम्, आईपैड, स्मार्टफोन इतयादीनां माध्यमेन गृहे गृहे उत प्रत्येकं व्यक्तिपुटतके च मनोरञ्जनसाधनमुपलब्धिमस्ति, चेत् दृश्यश्रव्यरूपस्य "क्रीडनीयकस्य" नाट्यशास्त्रस्य (क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत्–नाट्यशास्त्रम्) का उपयोगिता अवशिष्टास्ति? इति धारणा प्रश्नपूर्वकमुदेति। चेत्कथनीयं खलु उपयोगिता तु इदानीं पूर्णा दृश्यते। अद्यतनीये युगे चलचित्रविज्ञानं नाट्यविज्ञानं च अत्युन्नत–शिखरमगच्छताम्। हन्तां दैवात् नाट्यशास्त्रस्य तैः विचाररत्नैः नाट्यनयनेन वा अस्माकमल्पैव परिचयो भवेत्। नाट्यशास्त्रे नाट्यरचना, नाट्यप्रस्तुतिः, नाट्यरसः, रङ्गमण्डपम् प्रेक्षकः', भाषा, सम्बादश्चेत्यादीन् दृष्टिपथं कृत्वा भरतमुनिः यस्य जीवनदर्शनस्य (नाट्यदर्शनस्य)

व्यारव्यानमकरोत्, तस्य मूलमद्यापि यथावत् वर्तते। वाग्भूषणमयो बाह्यान्तः सौन्दर्यमयश्चैषः संसारः कल्प्यते, परं साहित्यं खलु समाजस्य दर्पणः। समाजः यादृशो भवति तादृशैव च साहित्ये प्रतिबिम्बितो भवति । समाजे रूपरङ्गे, वृद्धिह्रासौ, उत्थानपतने, समृद्धि, दुर्व्यव्यवस्था चेत्यादीनां –वास्तविकज्ञानाय प्रधानं साधनं भवति तात्कालिकं साहित्यम्। एवमेव संस्कृत्याः प्रधानं वाहकं च साहित्यमेव । अपि च संस्कृत्याः परम्परायाश्च उचितप्रचारप्रसारयोः साहित्यं नाम सर्वश्रेष्ठं साधनम् । उक्तञ्च–

दर्शनेनैव हरते मनः यत्तदेव हि लालित्यम्,
पातुं क्षमो जगतस्तमः यः स एव हि आदित्यः।
निमज्जनाद् संरक्ष्य राष्ट्रहितनौकां पुनः
नवसर्जनयपथमालोकयति यत्तदेव हि साहित्यम्।।

भारतीयनाट्यशास्त्रं यद्यपि लक्षणग्रन्थोऽस्ति परंत्वेतत् नन्दिकेश्वर–धनञ्जयसागरनन्दी–अभिनवगुप्त–शाङ्र्गधरादीन् नाट्यकलायाः चिन्तकान् प्राभावयत्। पुनश्च भास–शुद्रक–कालिदास–भवभूति–हर्ष–राजशेखरसदृशानां महतां नाट्यकाराणां नाट्यशिल्पस्य प्रेरणास्रोताऽभवत्। भरतस्य नाट्यदृष्टिः निन्तान्तं संवेदनामूला विद्यते। वयं सर्वेऽपि मनसः प्रमोदाय सङ्गीतनृत्यनाटकादिकं वाञ्छामः। सङ्गीतमस्माकं जीवनेन सहास्ति। व्यवस्थितभारतीयनाट्यविद्यायाः भरतमुनिः मूलप्रवर्तकः, व्याख्याता प्रस्तोता च बभूव। सः नाट्यरचना, नाट्यमण्डपम्, अभिनयम्, नाट्यप्रस्तुतिः, काव्यम्, सङ्गीतम्, नृत्यादीनां सुकुमारकलानां विभिन्नपक्षेषु तस्मित्पुराकाले एव विशदतया विवेचयामास, यदा विश्वस्यान्येषु भागेषु सभ्यता कला च स्वस्य प्रारम्भिकावस्थायामास्ताम्।

आङ्गिकम्, वाचिकम् अभिनयश्चैतत्त्रयमेव नाट्यस्य समुदायः। अनेन नाट्यसमुदायेन सामाजिकस्य प्रज्ञायां रससृष्टिर्जायते। भरतदृष्ट्यां नाट्यस्य प्रयोगसिद्धये गीतबाद्ये महत्त्वपूर्णोऽङ्गे वर्तते। नाट्ये गीतवाद्योः सतुलितप्रयोगस्य परम्परायाः विस्तृतविवेचनम् नाट्यशास्त्रे अष्टाविंशतितः चतुस्त्रिंशतं यावत् सप्तस्वध्यायेषु भरतेन कृतमस्ति।

नाट्यप्रयोगयस्य पूर्वरङ्गस्य (प्रथमचरणस्य) गीतनृत्याभ्यां मङ्गलारम्भो भवति । नाट्यप्रयोगस्य मध्येऽपि गीतप्रयोगस्य विधानं तु अस्त्येव प्राचीनभारतीयनाटकानामङ्कस्यारम्भान्तश्चापि गीतानां मधुरलयैः

रसासिक्तौ भवतः। भरतः गीतवाद्ये नाट्यप्रयोगस्याङ्गे तस्य सफलताया सहाकमात्रं मत्यते। गीतं वाद्यञ्च नाट्यप्रयोगे अलातचक्रवत् सन्निहिते भवतः। यथा भरतेन–

एवं गीतं च वाद्यं नाट्यं च विविधाश्रयम्।
अलातचक्रप्रतिमं कर्त्तव्यं नाट्ययोक्तृभिः।।

गीतनृत्ययोः विधानसमये तेन प्रतिपादितं यत् नाट्यस्य भावद्यारायां रागात्मकताया सञ्चाराय गीतनृत्यप्रयोगः क्रियते। अतः य? गीतवाद्ये नाट्यप्रयोगाय शक्तिं गतिं च न यच्छतः, तत्रानयोः प्रयोगः अपेक्षितो नास्ति। गीतवाद्यनृत्यानामतिशयप्रयोगे भूते सति प्रयोक्ता प्रेक्षकश्चोभौ खेदमनुभवतः। तथा च भावः–रसश्चास्पष्टौ जायेते। गीतानां प्रयोगः भावरसयोः प्रकाशनाय भवति।

कार्यो नातिप्रसंगोऽत्र नृत्यगीतविधिं प्रति।
गीते वाद्ये च नृत्ते च प्रवृत्तेऽस्ति प्रसङ्गः।
खेदो भवेत् प्रयोक्तॄणां प्रेक्षकाणां तथैव च ।
खिन्नानां रसभावेषु स्पष्टतानोपजायते।
ततः शेष प्रयोगस्तु न रागजनको भवेत्।। ना.शा. 5/158–60

भारतीयनाट्ये गीतवाद्ययोः परम्परा–

नाट्ये रागसञ्चाराय गीतवाद्ययोः प्रयोगो न केवलमारम्भे–अन्ते च भवति परं मध्येपि भवति। कालिदासस्य त्रिंषु नाटकेषु गीतानां प्रयोगः कृतोऽस्ति अभिज्ञानशाकुन्तलस्य प्रस्तानवायां ग्रीष्मर्तु लक्ष्यीकृत्य नटी गीतं प्रस्तौति । हंसपदिका कलविशुद्धगीतस्य स्वरसाधनां कुर्वती राजानमुपालम्भते। विक्रमोर्वशीयस्य चतुर्थाङ्के गेयपदानां प्रचुरताऽस्ति। मालविकाग्निमित्रे मालविका छलिकस्य प्रयोगं गीतेनैव कुरुते। रत्नावल्यां द्विपदिकायाः गायनं द्वाभ्यां स्त्रिपात्राभ्यां भवति। एवमेव मृच्छकटिकोऽपि इत्थं संस्कृतप्राकृतयोर्नाटकेषु गीतस्य प्रभावः स्पष्टोऽस्ति। पञ्चदश्याः शताब्द्याः प्रसिद्धमैथिलीनाटके पारिजातहरणे उमापतिः नैकेषां मधुरगीतानां योजनामकरोत्। नाट्यप्रयोगे गीतवाद्यनृत्तानां सन्तुलितयोजना भारतीयनाट्यपरम्परायाः एका विलक्षणतास्ति। वा इब्सन बर्नार्डशॉ इत्यनयोः प्रभावानन्तरम् आधुनिकभारतीयनाट्येन सर्वथा समाप्ता भवितुं नाशक्नोत्। पाश्चात्यनाट्यशैल्याः विचारकाः स्वयमेव नाट्यप्रयोगे गीतानां

महत्त्वङ्गीकृतवन्तः। ओपेरा (opera) तु गीतिप्रधाननाट्यस्य समानधर्मा अस्ति। भरतदृष्ट्यां गीतवाद्ये नाट्यस्य शैय्या विद्येते, अनयोः समुचितप्रयोगेण नाट्यप्रयोगः विपत्तिग्रस्तो न भवति।

गीते प्रयत्नः प्रथमं तु कार्यः शय्या हि नाट्यस्य वदन्ति गीतिम्।
गीते च वाद्ये च हि सुप्रयुक्ते नाट्यप्रयोगो न विपत्तिमेति।।

गीतस्य स्वरूपं प्रकाराश्च–

संगीतस्य गीतस्य वा स्वरूपं नादो भवति। नादः पराशक्तिब्रह्मणः प्रतीतकोस्ति। अयमेव स्फोटस्य व्यञ्जकोऽस्ति । स्फोटनादयोः स एव सम्बन्धोऽस्ति यः चक्षुरूपयोः। रूपं भवति चक्षुग्राह्यं चक्षुश्च रूपग्राह्यम्। यदा नेत्रयोः प्रत्यक्षीकरणविषयरूपात्मकं जगत् भवति अतः जगत् चक्षुग्राह्यं भवति । एवमेव चक्षुषी प्रत्यक्षीकरणविषयात्मकेन जगता गृह्येते । अथ वा गन्धे घ्राणग्राह्यता वर्तते घ्राणश्च सुगन्धिग्राह्यः। एवमेव कण्ठाभिधातेनोत्पनो ध्वनिरेव अकारादीनां व्यञ्जकोऽस्ति। नादोऽयं प्राणवायुना प्राणवह्निना चाभिव्यक्तो भवति।

नकारः प्राण इत्याहुः द कारश्चानलो मतः।

–मतङ्ग भरतकोष

अनेन नादेन बिना न तु गीतं भवति न तु स्वरः। वस्तुतस्तुः नादेनैव नृत्तमपि प्रवृत्तं भवति। समस्तं जगदेव नादमयमस्ति।

न नादेन बिना गीतं न नादेन विना स्वरः।
न नादेन बिना नृत्तं तस्मान्नादात्मकं जगत्।। भरतकोष

नाट्यभेदरूपा एव श्रुतयो भवन्ति। यतो हि नासां श्रवणं भवति। वस्तुतः श्रवणेन्दियग्राहत्वेन ध्वनिरेव श्रुतिः भवति। दर्पणे यथा मुखं विवर्तितं भवति तथैव स्वरा अपि श्रुतीसु विवर्तिताः भवन्ति तदा प्रतिभाषिताः जायन्ते । मृत्पिण्डादिभिश्च घटकार्यमुत्पद्यते अथवा अन्धकारस्थितघटादीनां व्यञ्जना दीपेन भवति। तथैव श्रुतिभिः सप्तस्वराणां व्यंजना भवति। श्रुतिभिरुत्पन्नम् अनुरणात्मकं स्वन् (स्वरः) श्रोतुः मनसः अनुरञ्जनं करोति कारणतः सः स्वरो भवति।

नादस्य प्रथमं श्रवणं भवति तदेव श्रुतिः भवति। परन्तु तत्कालमेव अव्यवहितरूपेण अनुरणन्–स्वरो (ध्वनिः) भवति। श्रोतुः मस्तिष्के स्व इत्यस्य प्रतिभासितम् अनुरञ्जनं च करोति । अभिघातेन उत्पन्नेयं श्रुतिः

नादो वा श्रोतुः आत्मनः अनुरञ्जनं करोति, अतः स्वरो भवति। एते स्वराः विभिन्नश्रुतिभिः उत्पन्नाः भवन्ति। एतेषां संख्या सप्त भवति–

षड्जः, ऋषभः, गान्धारः, मध्यमः, धैवतः, निषादश्च

पुनश्चैते स्वराः चतुर्धा भवन्ति –

वादी, सम्वादी, अनुवादी, विवादी च

स्वराणां संयोगो ग्रामो भवति। यथा ग्रामेषु कुटुम्बानां समूहो भवति अतएव समूहो ग्रामः कथ्यते। ग्रामः (स्वराणां संयोगः) रागस्य व्यवस्थापने सहायको भवति। सङ्गीतरचनायाः उद्देशोऽयमस्ति श्रोतुः मनसि रागोद्बोधनम्।

रागस्य प्रधानाः त्रयः स्वराः सन्ति– ग्रह, अंश, न्यासश्च।

1– ग्रहः– सङ्गीतस्यारम्भिकस्वरः।

2– अंशः– अंय वादी इव प्रधानः भवति। अंशे एव रागस्य सत्ता भवति। अभिनवगुप्तमतङ्गयोः दृष्ट्यां यथा पुरुषस्वरूपे मुखं प्रधानं भवति तथैव सङ्गीते अंशः। अंशस्वरस्य प्रयोगेण रागस्याभिव्यक्तिर्जायते।

3– न्यासः– गीतस्य परिसमाप्तिकालस्य स्वरो भवति।

गानक्रियायाः वर्णाः–

एतेषु वर्णेषु गेयपदानां वर्णनं भवति। एते चत्वारो भवन्ति– आरोही, अवरोही, स्थायी, सञ्चारी च।

1– आरोही–गेयपदस्यालापस्य क्रमे क्रमशः स्वराणामुतथानम्

2– अवरोही–गेयपदस्यालापस्य क्रमे क्रमशः स्वराणां पतनम्।

3– स्थायी–स्वाराणां ममता स्थिरता च।

4– संचारी–स्वराणां संचरणं भवति। अथवा आरोही अवरोही इत्यनेन संयोगेन संचारी स्वरो भवति।

भरतेन गीते चत्वारः प्रकाराः निगदिताः–

मागधी, अर्धमागधी, सम्भाविता पृथुला च

गीते तालः,लयः यतिश्च–

ताल इति प्रतिष्ठाबोधकशब्दोऽस्ति। गीतवाद्यनृत्यमेतत् त्रयं ताले वर्तमानं भवति। तालेन एवैतत्त्रयं प्रवृतं भवति। गीतवाद्यनृत्यमिति त्रयाणां कलानां कृते तालस्य महत्त्वमस्ति। ता इति शिवस्य न इति शक्तेश्च बोधकौ अक्षरौ, मिलित्वा शिवशक्योः समायोगेन तालस्योत्पत्तिर्जायते।

शिवशक्तिसमायोगात्तालनाम्नाभिधीयते । भरतकोष

तालेन गीतक्रियायाः कालस्यावधारणं भवति। भरतस्य दृष्ट्यां तालस्याव ारणं यः न जानाति सः न तु गायको भवति न वा वादकः।

यस्तु तालं न जानाति न स गाता न वादकः।
तस्मात् सर्वप्रयत्नेन कार्य तालावधारणम्।।

तालस्यैवाङ्गे–लयः यतिश्च–

द्रुत–मध्य–विलम्बिताः इति लयः। लयस्याधारेणैव यतिः भवति गीतस्यादि मध्यावसानेषु।

वाद्यम्–

भरतकाले मुख्यतः चत्वारि वाद्यानि प्रचलितानि आसन्।

1– ततम् – वीणा इव तारवाद्ययन्त्राणि ।

2– अवनद्धम् – मृदङ्ग इव चमर्णाच्छादितवायन्त्रम्।

3– सुषिरम् – वंशी वेणुः आदि

4– धनम् – तालम्, मंजीरा, झाल आदि ।

एते भारतीयवाद्यानि विभिन्नशैलीसु निमीयन्ते वाद्यन्ते एतेषां वाद्ययन्त्राणां प्रयोगेण गीतप्रयोगः इतोऽपि अधिकारागात्मको भवति स्म। यथा– गीतानिताललयाश्रितानि कृत्वा प्रस्तूयन्ते। तथैव वाद्यानि अपि ताललयाश्रितानि भवन्ति चेत् रागस्य प्रसारः सुष्ठु जायते। अतः गानस्य समुचितप्रयोगाय वाद्यप्रयोगः नितराम् अपेक्षते।

दशरुपकेषु वाद्यस्य प्रयोगो वर्जितो नास्ति। परन्तु एषः प्रयोगोऽपि रसभावदृष्टिगतेन एव भवति। उत्सव–यात्रा–मङ्गलावसर–विवाह–सङ्गमादीनामवसरे वाद्यस्य प्रयोगो भवति।

एवमेव भरतेन गावकवादकानां आसमव्यवस्थापि वर्णिनास्ति। वाद्ययन्त्राणां स्थापनं रङ्गमञ्चे कुत्र–कुत्र भवेदिति। तत्र मृदङ्गः पणवः दुर्दुरः दुन्दुभिः मुरज झलरी पटहः वंश–शंख ढक्किनी आदि नैकेषां वाद्यानां परिगणना कृताऽस्ति। संगीतशास्त्रस्यान्यग्रन्थेषु अन्यान्यप्रकाराणां वाद्यानां विवरणं प्रस्तुतमस्ति।

नृत्यस्याभिप्रायः अभिनयेन भवति। नाट्यशास्त्रेऽधिकांशाध्यायेषु अभिनव विषयकं वर्णनं समुपलभ्यते। भरतमुनेः नाट्यशास्त्रं समस्तकलानां विश्वकोषोऽस्ति। अयं च ग्रन्थः न केवलं नाट्यस्य अपितु ललितकलायाः

उपयोगिकलानां च आकरग्रन्थोऽस्ति । नाट्यशास्त्रं मङ्गलं पवित्रं चास्ति। देवताः चन्दनपुष्पैः कृतया पूजया तावन्तः प्रसन्नाः न भवन्ति यावन्तः नाट्याभिनयेन सङ्गीतेन वा ।

सन्दर्भग्रन्थाः-

1– भरतमुनिविरचितं नाट्यशास्त्रम्– डॉ. भवभूति शर्मा, डॉ. हरिदत शास्त्री– साहित्य भण्डार, मेरठ ।

2– काव्यप्रकाश– आचार्यविश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी।

3– काव्यप्रकाश– श्री निवास शास्त्री, साहित्य भण्डार, मेरठ।

4– भारतीय नाट्यकला – सुरेन्द्र दिक्षित, मोतीलाल वनारसीदास ।

5– संस्कृत काव्यशास्त्र का इतिहास– पी.वी.काणे. मोतीलाल वनारसीदास ।

6– संस्कृतकाव्येतिहासः आचार्य जगदीश मिश्र, चौखम्बा सुरभारती वाराणसी ।

7– नाट्यशास्त्र–अभिनवगुप्त ई–पुस्तकम् www.sanskrit.nic.in

शैवदर्शन–साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां योगदानम्

जितेन्द्र तिवारी
जे.आर.आफ.
राष्ट्रिय संस्कृत संस्थान,
भोपाल परिसर

भरतमुनेनाट्यशास्त्रे हिं अलङ्कारशास्त्रीयतत्त्वानां विवेचनं गौणतया कृतं विद्यते। नाट्यशास्त्रस्य प्रमुखमुद्देश्यं तावत् नाट्यतत्वानामभिन– यादीनामेव प्राधान्येन प्रतिपादनमवर्तत। अतः हेतोः अभिनयविवेचनप्रसङ्गे आनुसङ्गिकतया एव दोषगुणालङ्कारादयोऽपि विवेचनं सर्वप्रथमम् आचार्यभामहेनैव विहितम्। अस्मादेव कारणात् भामहः भारतीयालङ्कारशास्त्रस्य पितामहतया विद्वन्मण्डले समाद्रियते। यदि भरतमुनिः नाट्यशास्त्रस्य प्रथम आचार्य. तर्हि भामहः नूनम् अलङ्कारशास्त्रस्य आदिम आचार्य इति निश्चितम्।

अलङ्कारशास्त्रस्य प्रायः सर्वैरप्याचार्यैः स्वकीय–स्वकीयग्रन्थेषु सादरम् आचार्यभामहस्य तद्रचितग्रन्थस्य काव्यालङ्कारस्य च प्रमाणतया उल्लेखो विहितः। यैश्चाचार्यैः सह क्वचित् किञ्चित सिद्धान्ततया मतभेद आसीत् तैरपि भामहाचार्यः संस्मृतः'। अलङ्कारशास्त्रस्येतिहासे आचार्यभामहस्य महत्वप्रतिपादकानि अनेककारणानि सन्ति। तानि क्रमशः प्रस्तूयन्ते–

– भामहेन रचितः काव्यालङ्कारः खलु अलङ्कारशास्त्रस्य प्राचीनतमो ग्रन्थः। यद्यपि नाट्यशास्त्रमेतस्मादपि प्राचीनतरमिति सत्यं तथापि तन्मुख्यतयानाट्येन सह संबद्धमस्ति। भामहाचार्येण नाट्यशास्त्रात् पृथक् अलङ्कारशास्त्रयोपरि स्वतन्त्रतया काव्यस्य सर्वेषु अपि अङ्गेषु अतीव विस्तरेण महत्वपूर्णा विचाराः प्रस्तुताः।

– भामहेन सर्वप्रथमं "शब्दार्थौ सहितौ काव्यम्" इति शब्दार्थनिष्ठं काव्यलक्षणं प्रतिपाद्यं काव्ये शब्दार्थयोः समानं महत्वं स्वीकृतम्। तत्परवर्तिभिः रुद्रटानन्दवर्धनमम्मटप्रभृतिभिराचार्यैरपि मतमिदं सादरमङ्गीकृतम्। परं कस्तावत् काव्यस्यात्मेति भामहः स्फुटं न किमप्युक्तवान्।

– भामहेन काव्यस्य प्रमुखतत्त्वानां गुणदोषालङ्कारादीनां विस्तरेण विवेचनमकारि । भरतमुनिना दण्डिना च दशगुणा उदीरिताः। भामहपरवर्तिना वामनेन च विंशति संख्यकाः गुणाः कल्पिताः किन्तु स्वसमूक्ष्मेक्षिकया भामहेनैव सर्वप्रथममुकतं यत् काव्ये त्रय एव गुणा भवन्ति– माधुर्यम् ओजः प्रसादश्चेति । गुणानां संख्याविषये भामहस्य मतमिदमद्यापि सर्वमान्यं विद्यते।

– भरतमुनिना नाट्यशास्त्रे चत्वार एवालङ्कारा उक्ताः–

उपमा दीपकं चैव रूपकं यमकं तथा।
काव्यस्यैते ह्यलङ्काराश्चत्वारः परिकीर्तिताः।।

नाट्यशास्त्रम् 16.47

परं भामहेन चत्वारिंशदलङ्काराः प्रतिपादिताः।

– भामहेन काव्ये वक्रोक्तेरत्यधिकं महत्त्वं स्वीकृतम् कथितं च यत् वक्रोक्तिं विना तु अलङ्कारोऽपि निरर्थको जायते–

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।

भामहकाव्याः 2.86

अलङ्कारशास्त्रे हि वक्रोक्तेर्महत्वं नास्ति न्यूनम् अत एव "वक्रोक्तिः काव्यजीवितम्" इति कुन्तकेन नवीनः सिद्धान्तः प्रवर्तितः। यद्यपि भामहेनोक्ता वक्रोक्तिः तस्माद् भिन्ना वर्तते तथापि वक्रोक्तेः काव्यात्मत्व–प्रतिपादने मूलभूता भामहोक्ता वक्रोक्तिरेवास्तीति सुनिश्चितम्।

– भामनेहोक्तं यद् वक्रोक्तिं विना कोप्यलङ्कारो न सिद्ध्यति। वक्रोक्तिरहितत्वादेव हेतुसूक्ष्मशलेषा अलंङ्कारतया न प्रतिपादिता। उक्तं च–हेतुश्च सूक्ष्मो लेशश्च नालङ्कारतया मतः। समुदायाभिधानस्य वक्रोक्त्त्यनभिधानतः।

– यद्यपि दोषाणामुल्लेखो भरतमुनिनाऽपि कृतः परं काव्यदोषाणां वैज्ञानिकं विस्तृतं च विवेचनं सर्वप्रथमं भामहेनैव विहितम्। भामहः स्वग्रन्थे अलङ्कारदोषानपि प्रदर्शयामास।

– आचार्यभामहेनोक्तं यत् काव्यरचनाप्रभृत्तेभ्यो विद्वद्भ्यो न्यायव्याकरणशास्त्रयोः ज्ञानमत्यावश्यकं भवति तदैव दोषरहितं ललितं काव्यं निर्मातुं शक्यते अन्यथा न ।

प्राचीनपरम्परया ज्ञायते यद् भामहः काश्मीरवास्तव्य आसीत्। नरसिंहाचार्य–व्हूलरकृष्णमाचार्यादिभिः विद्वद्भिः तथ्यं प्रतिपादितमस्ति। अस्मिन् मते यद्यपि प्रबलं प्रमाणं नोपलभ्यते तथापि मतस्यास्य खण्डनेऽपि युक्तीनामभाव एव दृश्यते। काव्यालङ्कारस्य पाण्डुलिपिः दक्षिणभारतेऽपि प्राप्यते। अनेन केचिदालोचका अनुमानं कुर्वन्ति यत् असौ दाक्षिणात्यासीदिति। परमस्मिन् कथने प्रमाणं नावलोक्यते। सर्वप्रथमं भामहविवरणनाम्नी टीका विरचिता। अनेन भामहः काश्मीरवास्तव्य आसीदित्येव पक्षः समीचीनः प्रतिभाति। काव्यालङ्कारस्य निम्नलिखितपद्येनानुमीयते यत् आचार्यभामहस्य जनको "रक्रिलगोमी" आसीदिति।

अवलोक्य मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म।
सुजनावगमाय भामहेन ग्रथितं रक्रिलगोमिसूनुनेदम्।।

भामहकाव्यालङ्कारः 6.64

काव्यालङ्कारस्य प्रतिपाद्यविषयाः–

आचार्यभामहविरचिते काव्यालङ्कारे षट् परिच्छेदा विलसन्ति। तेषु मुख्यतया पञ्चविषयाः विवेचिताः सन्ति। ग्रन्थस्य समाप्तौ भामहेन स्वयमुक्तम्। यथा–

षष्ट्या शरीरं निर्णीतं शतषष्ट्यात्वलङ्कृतिः।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः।।
षष्ट्या शब्दस्य शुद्धिः स्यादित्त्वेवं वस्तुपञ्चकम्।
उक्तं षड्भिः परिच्छेदैर्भामहेन क्रणेण च।।

भामहः षष्टिश्लोकेषु काव्यशरीरस्य निर्णयमकार्षीत्। अत्रानेन काव्यस्योद्देश्यहेतुलक्षणभेदादयो विवेचिताः। काव्यलक्षणाप्रसङ्गे शब्दार्थयोः समं महत्वमुपपादयता तेनोक्तम्–"शब्दार्थौ सहितौ काव्यम्" इति। इदमेव काव्यलक्षणबाहुलयेन अद्यापि समादृतं वर्तते।

अलङ्काराः– षष्ट्युत्तशत (160) श्लोकेषु दृश्यतेऽलङ्कारनिर्णयः। भामहेन द्वौ शब्दालङ्कारौ षट्त्रिंशच्चार्थालङ्काराः प्रतिपादिताः।

दोषाः–भामहेन पञ्चाशत् श्लोकेषु दोषविवेचनमकारि।

न्यायः– सप्ततिकारिकासु भामहेन न्यायदर्शनसम्बद्धानां प्रमाणादीनां विवेचनं कृतम्। काव्यदोषनिवारणविषये एतेषां ज्ञानमावश्यकम्।

काव्यालङ्कारस्य काऽपि प्राचीनाटीका इदानीं नोपलभ्यते। प्राचीनसाहत्ये प्राप्यते यत् उदभटेन ग्रन्थमिममाश्रित्य भामहविवरणनाम्नी टीका रचितेति। अस्या टीकायाः उल्लेखः प्रतिहारेन्दुराजेन काव्यालङ्कारसारसङ्ग्रहस्य टीकायामेव विहितः।

एवं प्रकारेण काश्मीरवास्तव्य–आचार्यभामहस्य अवदानमलङ्कारशास्त्रे नितरां महत्वपूर्णमुपादेयं च वरीवर्ति। तेन यत् शब्दार्थनिष्ठं काव्यलक्षणमुक्तम् यच्च गुणास्त्रय एव कथिताः। अनयोः सिद्धान्तयोः प्राबल्येन अद्यापि सर्वाधिकं महत्त्वं विद्यते।

सन्दर्भग्रन्थाः-

1– भामहकाव्यालङ्कारः, प्रकाशकः–परिमल पब्लिकेशन्स, शक्तिनगर, दिल्ली–1990

2– भारतीय काव्य शास्त्र के नये आयाम, मनोहर काले, नमन प्रकाशन, नई दिल्ली–1999

3– अलङ्कार मीमांसा, डॉ. सुनीता गुप्ता, संजय प्रकाशन, दिल्ली–2000

4– संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्यायः, शारदा निकेतन, वाराणसी 2001

5– अलङ्कारशास्त्रेतिहासः, डॉ. जगन्नारायणपाण्डेयः, जगदीश संस्कृत पुस्तकालय, जयपुर–2004

शैवदर्श–साहित्यशास्त्रपरम्परयोः संवर्धने काश्मीराणां योगदानम्

बृजकिशोरः बिदुआ
शोधार्थी, शिक्षाविभागः
राष्ट्रिय संस्कृत संस्थान,
भोपाल परिसर

संस्कृतभाषोच्चारणपरिष्कारायं साहित्यशास्त्रस्य योगदानम्-

भारतवर्षस्य समस्मपि प्राचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैवावतिष्ठते। विद्वांसो हि देवा विद्वज्जनव्वहृता च इयं भाषा । सा एव देवभाषा, देववाणी, गीर्वाणी, गीर्वाणगीरित्यादिर्नामधेयैः व्यवहियते च। इयमेव भाषा विवृतम्। सा इयं भाषा भारतीयानां प्राणरूपिणी, जीवनोन्नायिका, सत्पथप्रदर्शिनी, आचारविचारवर्तनी, कर्तव्याकर्तव्यबोधनी, लोकद्वये हितं सम्पादिनी चक्षणं प्रकल्प्यतां स्मृतिपथे भाषाविहीनं जगत् कीदृशं प्रवर्तेत इति। न तत्र विचारविनिमयः। न वा नरीनृत्यते सम्प्रेषणपाटवम्। न च ज्ञान प्रदानम्। नापि मनोरञ्जनम्। नास्त्येव ज्ञानविज्ञानगोष्ठी।

न वा परस्परसम्पर्कसम्बद्धौ। न वा लिपिः नापि साहत्यं नैव शास्त्राणां विलसन्ति। केवलं तत्र आङ्गिकचेष्टाः प्रवर्तन्ते' यथा आदिमानवाः अकुर्वन् प्राक्। केवलं तत्र अर्थरहितध्वनयः व्यर्थचिह्नानि एव परस्परमवधानाकर्षणार्थं साधनायन्ते। न शक्यते अभीष्टं वक्तुं वा स्वीकर्तुम् इष्टं वस्तुविशेषम्। न तत्र अन्तरं विद्येत प्राणिपशुभ्यः पुरुषस्य। अतः मानवजीवनं निश्चप्रचम् अन्धकारमयं खलु भवति। तस्मात् लोकयात्राप्रवर्तनाय भाषैका एव साधनम् इति। आचार्येण दण्डिना काव्यादर्शे–

इहं शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।
इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

इत्थं भाषायाः अभावे एव भाषायाः आवश्यकता परिलक्ष्यते। भाषाविहीनः पशुरेव खलुं मानवः। भाषायाः ऋते जीवनं सुदुष्करमिति कृत्वा सर्वे

मानवाः भाषामधिगच्छेयुरिव। तथा चोक्तं–वाग्देवी वदनाम्बुजे लसति चेत् को नाम दीनो जनः इति। संस्कृतं न केवलं भारतीयभाषाणां जननी परं विश्वस्य अनेकभाषाभिस्सह संस्कृतस्य सम्बन्धो वर्तते। हिन्दी, मराठी, पंजाबी, इत्यादिभाषाः संस्कृतादुद्भूताः। दक्षिणाभारतस्य द्रविडभाषाः संस्कतेन प्रभाविताः सन्ति। संस्कृतायोगस्य प्रतिवेदने लिखितं यत्–आधुनिकार्यभाषाः संस्कृतादुत्पन्नाः द्राविडभाषाः तावद् आदिकालादेव साहित्यिकप्रयोगे संस्कृतेन पोषिताः सन्ति इति।

साहित्यशास्त्रानुसारेण भाषास्वरूपम्–

भाष् व्यक्तायां वाचि इत्यस्माद्धातोः प्रादुर्भावीयम्। अनल साहित्य कण्ठध्वनिनेतरेभ्यो भाषाभिव्यक्ति करण युतम्। वैयाकरणैः प्रकृतिप्रत्ययादिनिरूपणमेव भाषेति प्रत्यपादि। अपि च भाषेयं सदवसश्रवः इति। अतः भाषाविषयक काश्चन परिभाषाः विव्रियन्ते । परिणितवर्णयुक्तभाषानन्त्यवाप्नोति महाकविमाघेन शिशुपालवधे अवादि–

वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरपि।
अनन्तावाङ्मयस्याहो गेयास्येव विचित्रिता।। 2.72

भाषा विषये कपिलः एवमवादि–

ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूषितम्।
ध्वनिवाक्यपदज्ञानं भाषाविज्ञानमिषष्यते।।

संस्कृतभाषोच्चारणस्य साहित्यिकं महत्वम्–

संस्कृतस्य साहित्यं महासागरमिव वर्तते। महासागरेऽस्मिन् वेदाः, पुराणानि, महाकाव्यानि, इत्यादीनि देववाण्यामेव रत्नवत् प्राप्यन्ते। धर्मदर्शनयोः क्षेत्रे संस्कृतस्योत्कर्षः सर्वातिशायी। अतः संस्कृतभाषा सर्वासु भाषासु प्राचीनतमा सर्वोत्तमा साहित्यसंयुक्ता चास्ति। आमुष्याः भाषायाः वाङ्मयसम्पत्तिः अति विस्तृता वर्तते। नान्यासां भाषाणाम् एतादृशविस्तृतवाङ्मयसम्पत्तिः दृश्यते।

विश्वस्य सर्व साहित्यं संस्कृतभाषायामेव दरीदृश्यते। निखिलमपि वैदिकवाङ्मयं रामाणयं, महाभारतं, पुराणानि, स्मृतिग्रन्थाः, दर्शनानि, ध र्मग्रन्थाः, महाकाव्यानि, नाटकानि, गद्यकाव्यानि, गीतिकाव्यानि, आख्यानसाहित्यम्, नीतिग्रन्थादयाश्च संस्कृतभाषायामेव उपलभ्यन्ते। न केवल मेतदेव अपि तु व्याकरणम्, काव्याशास्त्रम्, गणितं, ज्योतिषम्, आचारशास्त्रम्, आयुर्वेदः, वास्तुकल्पशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम् छन्दः, कोशग्रन्थाश्च संस्कृतभाषायाः गौरवं वर्धयन्ति।

जातस्य शिशोः आदौ माता एव वर्णोच्चारणं शिक्षयति। ततः परं गुरुकुले गुरोः सन्निधौ क्रमेण वर्णपदवाक्यानां ज्ञानमधिगच्छति। यद्यपि अद्यत्वे लोकव्यवहारे भूरिशः संस्कृतव्यवहारो न दृश्यते। परन्तु संस्कृतवचनानां तु सर्वासु भारतीयभाषासु क्वचित् पाश्चात्य भाषासु अपि स्पष्टतया प्रयोगः परिलक्ष्यते। अंतः एतादृशानां जनानां कृते संस्कृतभाषा सर्वथाऽपरिचिता न भवति। अल्पेन प्रयत्नेन ते शीघ्रं ज्ञातुमर्हन्ति।

भाषोच्चारणस्य विशेषता–

शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरग्रीवं तथा स्थानविवर्जितम्।।
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।
निष्पीडितं ग्रस्तपदाक्षरञ्च वदेन्न दीनं न तु सानुसास्यम्।।

पाणिनीयशिक्षा

व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत।
मधुरं च न वाव्यक्तं चापि न पीडितम्।
सनायैकस्य देशस्य न वर्णा स्कटं गतः।।
यथा सुमत्त नागेन्द्रः पदात्पदं निधापयेत्।
एवं पदं पदाद् यन्तु दर्शनीयं पृथक् पृथक्।।

याज्ञवल्क्यशिक्षा

भाषणसमये सम्यक् समालोच्य भाषणं कर्त्तव्यमिति–

हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्य भाषणेनापि भाषयेत् सुनृतं वृतम्।।

सर्वदर्शनसंग्रहः

संस्कृतभाषायां वर्णः वर्णोच्चारणञ्च–

जगत् व्यवहारमूलं भाषा वाक्यसमूहरूपा। शब्दसमूहो वाक्यमर्थपरिसमाप्तौ। श्रोत्रेन्द्रियगाह्योऽर्थप्रत्यात्मकोवर्णत्मको शब्दः। ध्वनिरक्षरं वर्णो वा। उच्चार्यमाणानां शब्दानां विभागे कृते सूक्ष्मतया अवयवाः खलु वर्णो इत्याख्यायन्ते। यो वर्णो यस्यों भाषायां व्यवह्रियते स तद्भाषावर्णः। यथा क इति संस्कृतवर्णः। केचिद् वर्णाक्षरयोः समपर्यायत्वं मन्यन्ते। वर्ण तु चाक्षरे इत्यमरः। तर्हि कमिदम् अक्षरम्? न क्षीयते न क्षरतीति वाक्षरम्।

वर्णोच्चारणप्रक्रिया–

सामाजिकपरिवर्तनेन एकस्मिन् बहूनि परिवर्त्तनानि सञ्जातानि परन्तु संस्कृतपद्यद्वारा मूल्यशिक्षणार्थं यावत् सुलभं, मनोरञ्जनं, हृदयस्पर्शी न तथा अन्यद्वारा। अतः संस्कृत गद्य शिक्षणं नितरामावश्यकम्। यतोहि संस्कृत शिक्षणे देवनागरी लिपेः एव उपयोगः प्रयोगश्च श्रेयः मन्यते। एतेषु कौशलेषु श्रवणं पठनं च ग्रहणकौशलत्वेन भाषणं लेखनं च अभिव्यक्तिकौशलत्वेन च व्यवह्वियते।

वर्णानां स्थानप्रयत्नादिभि' सुष्ठु उच्चारणेनैव स्पष्टशब्दश्रवणं भवति। तेन सम्यक् अर्थावबोधोऽपि भवितुमर्हति। अतः भाषाधिगमेशुद्धवर्णोच्चारणस्य अनतिसाधारणमहत्त्वं वरीवर्ति। वक्ता वर्णोच्चारणं कथं करोति? वर्णोच्चारणकाले अन्ते जायमाना प्रक्रिया का भवति? एतत्सर्व वैज्ञानिकप्रक्रियाक्रमेण वर्णोच्चारणस्य क्रमिकप्रक्रिया वर्णिताऽस्ति पाणिनीयशिक्षायाम्।

आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः।।

ज्ञानशक्तिः– इच्छाशक्तिः– क्रियाशक्तिरिति तिसृषु मुख्यशक्तिष्वस्फुरितासु वर्णोच्चारणं नैव सम्भवतीति मन्यमानेयं शिक्षा एतासां क्रमस्फुरणमित्थं प्राचीनं वरीवर्ति। प्रथमं ज्ञानशक्तिराविर्भवतीति। यस्य वस्तुनोऽवबोधनार्थमुच्चारणं क्रियते ज्ञानशक्तिः तद्वस्तु प्रासङ्गिगं वस्तु अन्तरैः तस्य च सम्बन्धमित्युभयं बोधयति। यथा अहं ग्रामं गच्छामि इत्युक्ते तत्रत्यानां त्रयाणां पदार्थानामर्थः तेषां परस्परसम्बन्धश्च प्रथमं बुध्यते। ज्ञानोदयानन्तरम् इच्छाशक्तिः जागर्ति । ततो ज्ञातानां वस्तूनां मध्यात् कस्यचिद्विषये वक्तुमिच्छा भवति। इच्छाशक्तेः उन्मेषानन्तरं जैवस्पन्दात् क्रियाशक्तेः उद्रेको भवति।

ध्वनिषु शब्दानां तथा भाषायाः अस्तित्वविषये एवं वदन्ति–श्रोतृग्रहणे हि अर्थे लोके शब्दाः प्रसिद्धाः । (शाबरभाष्यम्, मीमांसासूत्रम् 2.5.1) विवक्षाजनितेन प्रयत्नेन कोष्ठस्थस्य वायोः प्रेरितस्य कण्ठताल्वादि अभिघातः यथास्थानं प्रतिघातात् वर्णाभिव्यक्तिः (न्यायसूत्रम् वात्स्यायनभाष्यम् 2.2.18)

संस्कृतोच्चारणशिक्षणविधयः–

उच्चारणस्य प्रायोगिकत्वात् साक्षात् प्रायोगिकमौखिकविधिरेव

प्राचीनकालात् आरभ्य अधुनाऽपि उपयुज्यमानः वर्तते। अत्र केचन उच्चारणशिक्षणविधयः प्रस्तूयन्ते—

1— गीतविधिः— यथा गीतं गायन्ति तद्वत् अ—आ—इ—ई—उ—ऊ—ऋ इत्यादि वर्णानां गानं क्रियते। गानमाध्यमेन पाठनात् अयं गीतविधिः। एषः विधिः शिशूनां कृते रुचिकरो भवति।

2— पदप्रयोजन विधिः— अस्मिन् विधौ पदमुच्चार्य वस्तु प्रदर्श्य पदस्याकारादि वर्णस्य उच्चारणं शिक्ष्यते। यथा—अ—अग्निः, आ—आम्रम्, इ—इन्द्रः, ई—ईश्वरः, उ—उमा इत्यादि। विधिरियं प्रान्तीयभाषास्वपि उच्चारणशिक्षणाय आधिक्येन उपयुज्यते

3— उपतन्त्र (पृथक्) वर्णोच्चारणविधिः अत्र विधावस्मिन् एकैकशः केवलम् एकैकस्यैव वर्णस्य पौनः पुण्येन उच्चारणं कृत्वा शिक्ष्यतें। यथा—केवलम् अ—अ—अ—अ— इति वर्णस्य शिक्षणम्। वर्णानां पृथक् पाठनात् स्वातन्त्र्यवर्णोच्चारणविधिः।

5— स्वयं शिक्षणविधिः— स्वयं शिक्षणविधः नाम अत्र भाषाप्रयोगशालायां यन्त्रस्य साहाय्येन एकैकस्य वर्णस्य शुद्धोच्चारणं शिक्ष्यते। अत्र स्वयं शिक्षा भवति। यन्त्रम् असकृत वर्णोच्चारणं कुर्वन् भवति तच्छ्रुत्वा स्वयं शिक्षेतव्यं भवति अतः स्वयं शिक्षणविधिः।

5— सूक्ष्मवर्णोच्चारणशिक्षणविधयः— यथा सूक्ष्मशिक्षणे एकैकस्मिन् कौशले शिक्षणकौशलसम्पादनाय प्रशिक्षणं दीयते । तद्वत् सूक्ष्मशिक्षणमिव सूक्ष्मवर्णोच्चारणं शिक्ष्यते।

6— परिष्कारविधिः— कक्ष्यायां संस्कृतस्य पाठनसमये शिक्षकः छात्रैः कृतस्य अशुद्धोच्चारणस्य परिष्कारः कारयेत्। अनुवाचन प्रश्नोत्तरकाठिन्यनिवारणसोपानावसरे शिक्षके परिष्कारविधः आश्रियते।

6— वाच्यसंयोजनविधिः— प्रारम्भिकस्तरे छात्रेभ्यः पृथक्—पृथक् रूपेण क्लिष्टध्वनीनां शब्दानाञ्च शुद्धोच्चारणस्य अवसरः प्रदेयः। ततः परं जटिलवाक्यानाम् उच्चारणाभ्यासं कारयेत्। छात्रत्रुटीनां संशोधनमपि कुर्यात्।

उपसंहारः—

यस्याः कस्यापि भाषायाः स्पष्टता, समृद्धता, परिपूर्णता, बोधगम्यता, सारसता, व्युत्पादकता इत्यादि गुणाः तस्याः

परिनिष्ठितपरिष्कृतपरिपूर्णध्वनिसमूहेन वर्णसमूहेन वा भवति। पूर्वोक्ताधारेण वयं वक्तुं शक्यते यत् संस्कृतसाहित्यशास्त्रानुसारेणापि संस्कृतभाषोच्चारण परिष्काराय प्राचीनाम् विधिनां समाहारः दरीदृश्यते।

येन वयं ज्ञातुं पारयामः उच्चारणे आगताः विभिन्नदोषाणां निवारणाय निम्नलिखितोषायाः कर्त्तुं शक्यन्ते।

1–लिषेः सम्पूर्ण ज्ञानम्।
2–पठने रुच्युत्पादनम्।
3–सुवातारणस्य निर्माणकरणम्।
4–शारीरिकदोषाणामुपचारार्थं परामर्शप्रदानम्।
5–पठनस्य अभ्यासकारणं तथा च आवृत्ति–पुनरावृत्त्योपरि बलप्रदानम्।
6–अध्यापकस्य स्वपठनम् आदर्शेन भवितव्यम्।
7–कठिनतायाः आधारेण पठनसामग्र्याः क्रमनिर्धारणम्।
8–मन्दबुद्धिछात्रेभ्यः पठितुम् अतिरिक्ताभ्यासस्यावसरः प्रदेयः।
9–छात्रेभ्यः मौखिकाभिव्यक्तेः लिखिताभिव्यक्तेश्च अधिकाधिकावसरः प्रदेयः।
10–पठनप्रतियोगितानामायोजनं कृत्वा पुरस्कार प्रदानम्।
11–शङ्कानां समाधामकरणम्।

साम्प्रतं न संस्कृतभाषा कस्यापि मातृभाषा, प्रान्तीयभाषा, राष्ट्रियभाषा। किन्तु वैज्ञानिकीभाषा सांस्कृतिकी जीवनमूल्यविज्ञानदायी। अतः आधुनिकविद्यार्थिनाम् इमामवश्यं ज्ञातव्यं भाषणीयमेव। किन्तु सरलसरसयुक्तभाषायाः अस्याः भाषाभाषणे क्लिष्यन्ति छात्राः। अतः तत्रस्यसमस्यावगमनाय शोधपत्रं स्वीकृतम्। इति।

परिशीलित ग्रन्थाः–

1–काव्यादर्श–भारतीयविद्या प्रतिष्ठान वाराणसी
2–शिशुपालवधम्–चौखम्भा संस्कृत सुरभारती वाराणसी
3–याज्ञयवल्क्यशिक्षा–भारतीयविद्या प्रतिष्ठान वाराणसी
4–साहित्यशिक्षणविधयः–प्रो.श्रीमती प्रभादेवी चौधरी, रा.सं.सं.भोपाल परिसर
5–संस्कृतशिक्षणम्–डॉ.संतोष मित्तल नवचेतना पब्लिकेशन्स, जयपुरम्
6–संस्कृतभाषा दर्शनम् यज्ञवीरदाहिया, भारतीयविद्या प्रतिष्ठान दिल्ली
7–कौशल बोधनी–डॉ. विश्वासः, संस्कृत भारती, नई दिल्ली
8–भाषा विज्ञान, डॉ.भगवान तिवारी, भारतीयविद्या प्रतिष्ठान वाराणसी।

काश्मीरप्रान्तस्य प्रमुखाः वैयाकरणाः

करुणेश कुमार शुक्ला
शिक्षाचार्यः

को न जानात्येतद्देशोद्भवो रसातलगतायाः पृथिव्या उद्धरणं भगवता वराहेण । भूमिरेषा कश्यपस्य कश्मीरापरनामधेयेतीतिहासम् शिवेन दक्षस्य यज्ञध्वंसोऽत्रैवाकारि । दक्षपुत्री सती एव शरीमाग्निात्रैवादहत्। अनेन दक्षकुलस्यात्रोद्भवो विचार्यते। एतद् दक्षकुलं सिन्धुरिस्तातानघोरन्तराले वर्तते स्मेति चिन्त्सं बुधैः ।

अयं च शालातुरीयस्य भगवतः पाणिने जनित्री दाक्षी, दक्षकुलप्रसूतासीत्। यस्या सहोदरो दाक्षायाणो व्याडिः पाणिनीपूर्ववर्तिभिर्बहुधा स्मर्यते ।

त्याडिः – लक्षश्लोकात्मकस्य संग्रहग्रन्थस्य कर्ता, महाभाष्यकारपतञ्जलिनाऽन्यैश्च वैयाकरणैः सादरं स्मृतः ।

संग्रहग्रन्थस्य नामाष्टाध्याय्या गणपाठे क्रतूक्थादि सूत्रान्ताट्ठक् सूत्रे उपलभ्यते । संग्रह एतत् प्राधान्येन परीक्षितम् । शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः ।

संग्रहं तावत् कार्यप्रतिद्वन्द्विभावान्मन्यामहे आपिशलिपाणिनीयव्यडीयगौतमाः द्रव्याभिधानं व्याडिः, इति च महाभाष्यम्।

दाक्षिह्रदः, दाक्षिवदरी, दाक्षिपिङ्गलः, दाक्षिपिशङ्गः, दाक्षिशिल्पी, दाक्षिशाला, दाक्षिशाल्मली, दाक्षिरक्षा, दाक्ष्यश्वत्थ, दाक्षिकूटः इत्यादयः घोषादिषु च सूत्रोदाहरणानि काशिकायाम्। दक्षकुलम् एतद कश्मीरेऽनुसन्धेयम्।

संग्रहस्य स्वरूपं भर्तृहरिणोक्तं वाक्यपदीयते –

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान्
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ।
कृतेऽथ पतञ्जलिना गुरूणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।।

कैयटः – अल्पमतीनां जिज्ञासूनां कृते भर्तृहरिणा महाभाष्यदीपिका

कृतेति तदुक्तिः । तामेवावलम्ब्य कश्मीरस्थजैयटसूनुकैयटेन महाभाष्याब्धितरणाय प्लववत् प्रदीपटीकाकृतेति। कैयटोक्तिः महाभाष्यार्णवावारपारीणं निृवत्तिप्लवं यथागमं विधास्येऽहं कैयटो जैयटात्मजः ।

यद्यपि विंशतिष्टीकाकारा वर्तन्ते महाभाष्यस्य, तथापि कैयट कृतप्रदीपमनाश्रित्य महाभाष्याध्ययनं न प्रवर्ततेऽघत्वेऽपीत्यनेन गौरवं तस्य विज्ञायते। कैयटकृत प्रदीपस्योद्योत नाम्नी टीकाकृता नागेशेन ।

ज्येष्ठकलश :–

कौशिकगोत्रीयमुक्तिकलशस्यः पौत्रः, राजकलशस्य च पुत्रो ज्येष्ठकलशः, विक्रमाङ्कदेवचरितस्य कर्तुः विल्हणस्य च किता कश्मीरस्थप्रवरपुरसमीपस्थकोणमुखग्रामवासी । महाभाष्यस्यकापि टीका कृतानेनेति लोकः । तस्य प्राङ्गणं महाभाष्यउध्येतृभिः शोभते स्मेति विल्हणोक्तिः ।

महाभाष्यव्याख्यामखिलजनवन्द्यां विदधतः ।
सदा यस्यच्छात्रैस्तिलकितमभूत् प्राङ्गणमपि ।।

स तुं कश्मीराच्चालुक्यषष्ठस्य चिक्रमादित्य त्रिभुवनमल्लस्य सभामलङ्कर्तुगत इति कालस्तस्य द्वादशशताब्दी विक्रमस्य ।

क्षीर – देशान्तरादागमक्याथ व्याचक्षणात् क्षमापतिः प्रावर्तयत्।

विच्छिन्नं महाभाष्यं स्वमण्डले। क्षीरामाभिधानांच्छब्दविधो–पाध्यात्संभृतश्रुतः बुधैः सह यथौ वृद्धिं स जयापीड पंडितः ।

जयापीडेन कश्मीरराज्ञयादेशेन कश्मीरे महाभाष्यस्य प्रचारः प्रसारश्च कृतः क्षीरेण। सैव क्षीरस्वामी, क्षीतरङ्गिणीकारः अमरकोशटीकाकारश्चेत्युक्तिः। क्षीरतरङ्गिणी पाणिनीयधातुपाठस्य पाश्चमोत्तरपाठस्य वृत्तिरस्ति।

चन्द्राचार्यः –

कश्मीरराजाभिमन्योरादेशेन कश्मीरे विच्छिन्नं महाभाष्याध्ययनं चन्द्राचार्येणैव प्रवर्तितमिति कल्हणः । एषोऽभिमन्युः कलिष्कोत्तरवर्ती। कनिष्काश्च बुद्धोत्तरवर्तीति निर्णयः कालः कल्हणदृशा । चन्द्रगोभीत्यपर नामधेयं तस्य। चन्द्राचार्येण पाणिनिमाश्रित्य स्वीयं नवीनं चान्द्रव्याकरणमपि प्रवर्तितं यस्य वैशिष्ट्यमस्ति संज्ञाराहितत्वम्। चन्द्रोपज्ञमसंज्ञकं व्याकरणमिति चान्द्रवृत्तिः । वामनीयलिङ्गानुशासनवृत्तिश्च । लघुविस्पष्ट सम्पूर्णमुज्यते शब्दलक्षणमिति चन्द्राचार्यस्य स्वोपज्ञवृत्तिश्च ग्रन्थः एव

पतञ्जलिमाश्रित्य विरचितस्तथापि स्थलेष्वनेकेषु तञ्जलिमप्यप्रमाणिकृत्य वर्तते इति ज्ञेयम्।

सम्प्रत्यपूर्णमेव लभ्यते चान्द्रव्याकरणम्। यद्यपि जर्मनी देशे मुद्रित संस्करणे षडध्यायात्मके ग्रन्थे समाप्तं चेदं चान्द्रव्याकरणं शुभम् इति पाठो लभ्यते तथापि तत्र नास्ति तस्य पूर्णता इतिं स्वरप्रक्रिया भाग द्वयध्यायात्मकोऽप्यासीदस्य यश्च नोपलभ्यते इति वक्ष्यते।

जगद्धर भट्टः – कश्मीर पण्डितेन जगद्धर भट्टेन स्वपुत्रं यशोधर भट्टमध्यापयितुं कातन्त्रव्याकरणस्य बालबोधिनी वृत्तिः कृता चतुर्दशशताब्धाम्। या च प्रसिद्धिंगता कश्मीरे। जगद्धरभट्टस्यनप्तृकन्या-तनयातनूजेन राजानकशितिकण्ठेन बालबोधिन्याव्याख्या कृता ।

उव्वट- वज्रटस्य पुत्रेणोवटेन यजुर्वेदभाष्यकृता शुक्लयजुः

प्रतिशाख्यभाष्यकृता, ऋकसर्वानुक्रमणीभाष्यकृता

ऋक्प्रातिशाख्यस्यापि भाष्यं कृतम् । काश्मीरस्य वैयाकरणेषु उव्वटमहाभागस्य प्रमुखं स्थानं वर्तते।

क्षेमेन्द्रः – सारस्वतव्याकरणस्य चादिमः श्लोकः –

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।
सरस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तारम्।।

अन्ते च प्रायः अनुभूति स्वरूपाचार्य विरचिते इति जानान्ति जनाः तमेव सारस्वतव्याकरणस्य कर्तारामिति । परं सारस्वतप्रक्रियायां क्षेमेन्द्रकृतायामन्तिमं वाक्यम् इति श्री नरेन्द्राचार्य कृते सारस्वतव्याकरणे क्षेमेन्द्र टिप्पणं समाप्तम् इति क्षेमेन्द्रोपि वैयाकरणः कश्मीरदेशीयः ।

पुण्यराजः- वाक्यपदीयस्यद्वितीयकाण्डव्याख्यां विरचितवता ।

पुण्यराजेन तत्रभवता भर्तृहरिणा स्वो यज्ञवृत्तौ समल्लिखितो लक्षणसमुदेश आगमभ्रंशाद् नोपलभ्यते । बाधासमुद्देशोपमा-समुद्देशावापि पुण्यराजेन नामग्राहं स्मृतौ। तावपि नोपभ्येते । तथापि दंशस्य व्याख्या कृता प्रकाश इति पुण्यराजेन तामाश्रित्यैवाद्याम्बाकर्त्रीत्यादय व्याख्याः प्रवृर्तिताः । कश्मीरदेशीय पुण्यराजे इति।

हेलाराजः- वांक्यपदीयस्य पदकाण्डस्य कृत्सना व्याख्याकृता हेलाराजेन प्रकाशाभिधा । या च अल्पेव्वव स्थानेषु

भ्रष्टा समुपलभ्यते। व्याख्यापरसनि च स्वीयं परिचयं ददाति हेलाराज– कश्मीरभूमिपालस्य राज्ञो जयापीडस्यामात्यपदवी धुरन्धरस्य लक्ष्मणस्य वंशे स स्वजुनर्लेभे । तस्य पितासीद् भूतिराजः । प्रकाशटीकायां स स्वीयान्ग्रन्थान् नामतो निर्दिशति क्रियाविवेकः, चंद्रमासिद्धिः, वार्तिकोन्मेषः इति च । हेलाराजः परममहेश्वराचार्याणां श्री अभिनवगुप्तपदानां गुरूणामन्यतमो गुरूर्वभूवेति तन्त्रालोकतो ज्ञायते। वाक्यपदीयस्य काण्डत्रयस्य व्याख्यां तत्त्वेन परं सम्प्रति तृतीयकाण्डस्यैवोपलभ्यतें यस्यान्तिमःश्लोकः –

मुक्तापीड इति प्रसिद्धिमगमत् कश्मीरदेशे नृपः
श्री मान्ख्यातयशा बभूव नृपतेस्तस्य प्रभावानुगः ।
मंत्री लक्ष्मण इत्युदारचरितस्तस्यान्ववाये भवो
हेलाराजं इमं प्रकाशमकरोच्छ्रीभूतिराजात्मजः ।।

फुल्लराजः – उपरितनेन विज्ञायते यत् फुल्लराजेनापि वाक्य–पदीयस्य काण्डत्रयस्य टीकाकृता या नोपलभ्यते सम्प्रति।

भर्तृहरि :- भर्तृहरेरभिजनविषये किञ्चिद् विचारयामः । कुत्रापि स जन्मस्थानस्य संकेतं नैव विद्यते।

परन्तु केषाञ्चित् सम्भाव्यमानतया विशुद्धानां प्रमाणानां सद्भावत् कश्मीराभिजनोऽयं महात्मा भर्तृहरिरिति प्रतीयते।

वामनजयादित्यौ – काशिका काशिषु भवेति निर्दिशति पदमञ्जरीकारो हरदत्तमिश्रः । परन्त्वस्याचार्यतारौ जयादित्यवामनौ काश्मीरकावास्तामिति विद्यते सार्वात्रिगी प्रसिद्धिः । वाक्यपदीयेति ग्रन्थाभिधानं काश्मीरकाभ्यां विरचिता काशिकैव सर्वप्रथमं संकेतयन्ति। यतः तयौः परिचयो भर्तृहरिणा साकं नितान्तं घनिष्ठो निकटश्चेति कथनं सम्भावनाकोटिं परिवृणाक्ति इति बलदेवोपाध्यायास्तत्रैव। अयच्च काश्मीरकैरेव प्रत्याभिज्ञादर्शनग्रन्थेषु शैवाचार्यः भर्तृहरेः काशिकाः क्वचित् खण्डनाय क्वचिच्च मण्डनाय प्रथमं बहुश उद्यता आलोचिता, विवेचिताश्च ।

काव्यप्रयोजननिर्धारणे कश्मीराचार्याणाः योगदानम्

जगदीश शर्मा
साहित्याचार्य
श्री रणवीर परिसर, जम्मू

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।
यावत्प्रयोजनं नोक्तं तावत् तत्केन गृह्यते ।।

भो सुधियः सुविदितमेवेतत् यत् अस्माकं प्रत्येकस्मिन् कार्ये प्रयोजनाविशेषः भवति एव। उक्तञ्च प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते। तर्हि लोकोत्तरवर्णननिपुणकविकर्म काव्यम् यद् उच्यते तस्यापि प्रयोजनविशेषः स्यादेव । यतोहि मानवस्य प्रवृत्तिः प्रयोजनमूला भवति। प्रयुज्यते अनेनति प्रयोजनम्। केनापि प्रयोजनविशेषेणैव कर्मणि प्रवृत्तो भवति बुद्धिमान् मानवः । प्रयोजनं विना कर्मणि प्रवृत्तिरेव नोत्पद्यते ।

एवं च विषयः अधिकारी सम्बन्ध प्रयोजनञ्च इति अनुबन्धचतुष्टयम् कथ्यते। ग्रन्थादौ अनुबन्धचतुष्टयनिवर्हण परम्परा अपि साहित्यं शास्त्रे वर्तते। अनुबध्यते अनेनति अनुबन्धः अनुबन्धनम्। उक्तञ्च –

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यमनुबन्धचतुष्टयम् ।।

अतः विषयश्चाधिकारी च सम्बन्धः प्रयोजनः । एतेषु चतुर्षु विषय प्रयोजनं च द्वौ अनुबन्धो मुख्यौ स्तः अतः अनयोः द्वयो शब्दतः निरूपणम् ग्रन्थकारस्य कृते अनिवार्य वर्तते एवं प्रकारेण प्रयोजनस्य महत्ता अधिगता अस्माभिः ।

अतः प्रायः सर्वैरपि काश्मीरैः आचार्यैः स्वेषु–स्वेषु काव्यशास्त्रीय ग्रन्थेषु काव्य प्रयोजनं निर्धारितमेव । तेषां काव्य प्रयोजन विषयक मतं प्रयोजनानि यथाक्रमम् निरूप्यते तत्रादौ अलंकार सम्प्रदायस्य संस्थापक भामहाचार्यस्य काव्य प्रयोजनमित्थं वर्तते।

धर्मार्थकामोक्षणां वैचक्षव्यं कलासु च ।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिबन्धनम् ।।

अतः भामहाचार्येण काव्यप्रयोजन रूपेण प्रयोजनचतुष्टयम्

निर्दिष्टम्—

1) चतुर्वर्गफलप्राप्तिः
2) कीर्तिः
3) सकलकलाज्ञानम्
4) प्रीतिञ्च

तदनन्तरम् आचार्य दण्डिना काव्यदर्शमध्ये लोकव्युपत्ति एकैव प्रयोजनं काव्यस्य संसूचितम् तद्यथा –

आदिराजयशोबिम्वादर्श प्राप्तवाङ्गमयम् ।
तेषां सन्निधानेऽपि न स्वयं पश्यन्नश्यति ।।

तदनु काव्यालङ्कारसूत्रवृत्तिकार आचार्य वामनेन काव्यप्रयोजन द्वयं निदिष्टम् तद्यथा –

काव्यं सददृष्टार्थ प्रीतिकीर्तिहेतुत्वात् ।।

अनेनं प्रकारेण कीर्ति प्रीतिञ्च प्रयोजनद्वय वामनमतं एवं च वामनेन अनयो प्रयोजनयो महत्वं प्रतिपादनाय काव्यालङ्कार सूत्रवृत्तो उक्तम् –

प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः ।
अकीत्तिवत्तिनीं त्वेव कुकवित्वविडम्बनाम् ।।
कीर्ति स्वर्गफलमाहासंसारं विपश्चितः ।
अकीर्ति तु निरालोकनरकोद्शदूतिकाम् ।।
तस्मादत्कीर्त्तिमुपादातुं अकीर्तिञ्च निबर्हितुम् ।
काव्यालङ्कार सूत्रार्थः प्रसाद्यः कविपुङ्गवैः ।

अनेन एव क्रमेण रूद्रटाचार्यस्य काव्यालङ्कारे इदम् प्रयोजनम् उक्तम् –

ननु काव्येन क्रियते सरसानामवर्गमश्चतुर्वर्गे ।
लघुमृदु च नो रसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्यः ।।

अनेन स्वष्टमेतत् रूद्रटाचार्येणानुमतानि प्रयोजनानि –

1) धर्मः
2) कीर्तिः
3) अनर्थोपशमनम्
4) अर्थः

5) सुखप्र्प्तिः ।

इदामीं क्रमः समायाति ध्वनिवादिनः आचार्य आनन्दवर्धनस्य तैः ध्वन्यालोकादौ एव उक्तम् –

काव्यस्यात्मा ध्वनिरिति वुधैर्यः समाम्नातपूर्व
स्तस्याभावं जगदुरपरे भाक्तमादुस्तमन्ये
केचिद् वाचां स्थितमविषये तत्वमूचुस्तदीयं
तेन व्रूमः सहृदयमनः प्रीतये तत्स्वरूपम् ।।

एवं प्रकारेण आचार्येण सहृदयमनःप्रीतये इति प्रयोजनविशेषो निर्दिष्टम्।

कुन्तक :– तदनन्तरं वक्रोविकार कुन्तकाचार्यः इत्थं काव्य प्रयोजनानि निर्धारयति । तद्यथा –

धर्मादिसाधनोपायः सुकुमार क्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाहलादकारकः ।।
व्यवहारपरिस्पन्द सौन्दर्यव्यवहारिभिः ।
सत्काव्यादिगमादेव नूतनौचित्यमाप्यते ।
चतुवर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तक्षचमत्कारो वितन्यते ।।

अनेन कमेन कुन्तकाचार्येण काव्यप्रयोजन रूपेण चतुवर्गफलप्राप्ति परमाहलादःएवं व्यवहारज्ञानरूपी प्रयोजनं विशिष्ट रूपेण निर्दिष्टम्।

एवं प्रकारेण काश्मीरी आचार्याणां काव्य प्रयोजन विषयकं मतं नैरन्तर्येन.......वर्धमानं व्यापकताञ्च धारयन् आसीत्। किन्तु तदनु आचार्य मम्मटेन स्वकाव्यप्रयोजननिरूपणावसरे सर्वेषां आचार्याणां समन्वयं कृत्वा वैशिष्टयेन काव्यप्रयोजन निरूपितम् । तद्यथा –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।

एतान्येव षटप्रयोजनानि सन्ति । काव्यात् यशः प्रभृतीनि प्रयोजनानि लभ्यन्ते इत्येतत् दृष्टान्तेनोपपादपन आदौ :–

यशसे – मम्मटपूर्ववतिनां काव्यशास्त्रिणा मध्ये भामह काव्य प्रयोजनप्रतिपादयन यशः पदं स्थाने कीर्ति पद प्रयुक्तः एव नाट्य शास्त्रे आचार्यभरतः दृश्यकाव्ये नाट्यं–यशस्यम् उक्तवान् तदेव आचार्येण यशःपदः

गृहीतः ।

रघुवंश कुमारसम्भादिकाव्यकर्तुः कालिदासस्याद्यापि पित्रादिकुलं वा कश्चिज्जानाति नवादानादिकं किञ्चित्प्रसिद्धं येन तादृशं यशः स्यात् किन्तु काव्यमेतत् कारणमिति ।

2) अर्थकृतें : – गृहस्थमानवानाम् एषणात्रये मध्ये एका वितैषणा वित्तमधनम्। धावकानामा कञ्चि पण्डितः प्राक परमदरिद्रक्षिचतामणिनामक महामन्त्रविशेषो– पासनप्रासादेन विचित्र्य विद्याशाल्यपि निर्धनत्वेन बहुक्लिश्यमानः सन् नैषधीयचरिताख्यं शतसर्गात्मकं विचित्रं महाकाव्यं विरच्य्गुणशिरोमणिं श्रीहर्षनामानं राजानं तेनातितुष्टात् ततः शतसहस्रात्मकरूण्यमुद्रोत्पत्ति– योग्यतां भूमिं प्राप्तवान्।

